Shri Raghunatha Temple MSS. Library,
JAMMU

No. ३६६५ / छ

Title किरातार्जुनीयटीका "अन्वयदीपिका"

Author नृसिंहः

Extent ३४ पत्र Age

Subject काव्य

© Dharmartha Trust J&K. Digitized by eGangotri

किरातार्जुनीयटीका अन्वयदीपिका

२६५

२६ पत्राणि

ॐ श्री

© Dharmartha Trust J&K. Digitized by eGangotri

योधिरिव। समुद्र इव उपमितिसमासः। पयोधौ समुद्रे मग्नं सायं सागरे मज्जतिपरे घन्म
ऊती त्यागमः।) किं ल ह्नतो प- आपत्पयोधौ अगाधदुस्तारे पुनः किं ल ह्नतं चोड्डी
यमानं उद्यतं। किं लवा रिपुतिमिरं उदस्य निरस्य उद्दिद्दिपत्यन्यैः। रिपुस्तिमिरमि
व अंधकारमिव इति रिपुस्तिमिरं। पुनः किं ल ह्नतं दिनकरं। अंधकारं उदस्य निरस्य
उद्दीयमानं उज्ज्वलं तं। यथा लक्ष्मीः एवंविधं सूर्यं पुनरुपैति। तद्वद्भवंतं उपैतु। इत्या
शीरलंकारः। संप्रुप्रतिवचनं पोपमा वधिर्विधानं दैवये त्यमरः॥४६॥ ॥श्रीः॥ ॥
इतिश्री अन्वयदीपिकायां किरातार्जुनीयटीकायां प्रथमः सर्गः॥ ॥श्रीः॥ ॥विहितामि
ति। अथानंतरं उपधुक्षानंतरं वृकोदरो भीमः नृपं युधिष्ठिरं उवाच उक्तवान् आक र्त्तेरि लिट्॥
वृको वधिरादेशः वृकस्य उदरमिव उदरं यस्य सः वृकोदरः। किं ल ह्नतां वचनां उपपाति
तां। उपपत्तिरस्यास्तीति उपपत्तिमत् युक्तियुक्तं। पुनः किं ल ह्नतां वचनां ऊर्जितां आश्रयां उर्जि
तः उदारार्थैः तस्यांश्रयं महार्थां गंभीरार्थामित्यर्थः। किं ल यां गीरं वाणीं निशम्य श्रुत्वा। किं ल
ह्नतां गिरं। गरीयसीं सारवत्तीं। पुनः किं ल ह्नतां गिरं। प्रियया द्रौपद्या विहितां उक्तां। प्रियया ग्र
हणामस्याहितोपदेष्टत्वस्य वनार्थं॥ अत एव पुनः किं ल ह्नतां गिरं। मनः प्रियां। मनसः प्रि

१। २ ऊर्जितस्या वीरस्य स्य आश्रयं ऊर्जितं ... धीर्येयस्य तत ऊर्जितं ... इति बवर

© Dharmartha Trust J&K. Digitized by eGangotri

१०

गा। मनःप्रिया। तं। अभिमतार्थसंयोगान्मनोहरं। विहितामिति विपूर्वस्य दधातेः क्रियासामा
न्यवाचित्वाद्योग्यविशेषतात्पर्यवसानात्। विशेषणद्वयेनापि गिरां ग्राह्यत्वमुक्तं॥१॥ यदवो
चदिति। किमवोचदित्याह। मानिनी क्षत्रियकुलाभिमानवती द्रौपदी यद्वचनं अवोचत् अ
वादीत्। स्नेहमयेन स्नेहप्रचुरेण चक्षुषा ज्ञानचक्षुषा परितः समन्तात् सर्वत्र परिणामं अ
अवेक्ष्य परिपाकं विविच्य स्नेहमयेन इति आप्तत्वमुक्तं। यद्वा नोस्मान् अवेक्ष्येति शेषः। त
द्वचनं सर्वस्यापि विस्मयं विदधीत। कुर्वीत। किं तत्तादृशं वचनं। वागधिपस्यापि बृहस्प
तेरपि दुर्वचं। वक्तुमशक्यं। यद्वा तद्वचनं वागधिपस्यापि विस्मयं विदधीतेति संबन्धः। दु
र्वचं केनापि वक्तुमशक्यं इति शेषः॥ यत्र स्त्रैणमपि शास्त्रं अनुरुणद्धि हितं चानुबध्ना
ति। अतो विस्मयकरणं स्त्रीकार्यं चेत्तद्वचनमिति तात्पर्यं॥२॥ विस्मयकरत्वे हेतुमाह।
विषमोपीति। हे राजन् पुंसा विषमोपि दुर्बोधोपि नययोनीतिशास्त्रं विगाह्यते गृह्यते किंलक्षणो
नयः। कृततीर्थः। कृतः तीर्थः गुरुर्यस्मिन् यः शास्त्रे सः कृततीर्थः। कृताभ्यासो ह्युपायः। तीर्थं
शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु इति विश्वः। कृतोपाध्यायेन पुंसा नीतिशास्त्रं व्याख्यातुं शक्य ॥२०
त इत्यर्थः। कइव पयसां आशय इव। क इव। यथा पयसां आशयः पुंसा पुरुषेण विषमो
पि दुस्तरोपि विगाह्यते प्रविश्यते किंलक्षणः जलाशयः कृततीर्थः। तीर्थं योनौ जलावतारा

© Dharmartha Trust J&K. Digitized by eGangotri

सोपानमितियावत्।यस्मिन्प्रदेसः।तत्तीर्थं।तीर्थं योनौ जलावतारे चेति हलायुधः।तु पु
नरर्थे।तु पुनः तत्र नये सः तादृशः पुरुषः विशेषदुर्लभः विशेषेकर्तृकरणे न त्वं तं दुर्लभः।दुः प्राप्तः संकः य
न्नताबहुलमितिसमासः।तत्त्वं बुद्धीसत् उपन्यस्यति संधिविग्रहयानासनसंश्रयद्वैधीभावा
ख्यं कार्यं स्नानादिकं कार्यं तस्य कार्यस्य वर्त्मकर्म पदं सत् साधु सम्यक् देशकालाद्यवि
रुद्धं यथा भवति तथा उपन्यस्यति।उदाहरति।कथयति उपन्यासस्तु वाङ्मुखं उपोद्घातउ
दाहरइत्यमरः।जलाशयपक्षे तत्र जलाशये यः पुमान् सत् साधु सम्यक् यथा भवति तथा ग
र्तपाषाणादिरहितं प्रदेशं उपन्यस्यति।उदाहरति दर्शयति।सः विशेषदुर्लभ इति यथा केन
चित् कृततीर्थे पयसि गंभीरप्रवेशारः संति तीर्थकरस्तु विरलः तद्वन्नर्येपि गूढं तत्त्वं सति व
क्तरि बोद्धारः संति वक्ता तु न सुलभः।इयं च साधुवक्तीति युज्यते विस्मयइत्यर्थः।अथ अस्याः श्रे
यसः वचनं ग्राह्यं तत्र हेतुमाह॥आपरिणामेति।पुनः किं भुवा वेत्याहाह राजन् अस्याः श्रेय
घाः अस्मिन् वचसि वचने अभिमानरक्षणराज्यलाभादि बहुरनेकः गुणः दृश्यते।कस्मिन्नि
वात्तेषजे इव यथा औषधे बहुर्महान् आरोग्यबलपोषादिगुणो दृश्यते।तद्वदित्य
र्थः।किं लक्षणे वचसि आपरिणामसुखे परिणामः फलकालः तत्र सुखदे तौ।किं लक्षणे

© Dharmartha Trust J&K. Digitized by eGangotri

बहु। अल्पीयसि स्वल्पतरे। पुनः किंलक्षणे भेषजे। परिणामसुखे। रोगपरिपाकावस्थायां
सुखे सुखकारिणि। पुनः किंलक्षणे वा वचसि। गरीयसि भूयिष्ठे॥ पुनः किंलक्षणे भेषजे। गरी-
यसि श्रेष्ठे। पुनः किंलक्षणे वचसि। हितौजसां प्रचयकेयुद्धाद्युपोद्बलकवाक्यदायिनि। हृतं हीणमो-
जः बलं शक्तिर्येषां ते हृतौजसः तेषां। पुनः किंलक्षणे भेषजे। हृतौजसां। संशयात् दुःख-
जनके अनेन शांतिर्भविष्यति न वेति। पुनः किंलक्षणे वा वचसि। अतिवीर्यवति। वीर्यमोहात्मकथा
तत्र अल्पं तत्सामर्थ्यवति। पुनः किंलक्षणे भेषजे। रोगशांतिकरणसामर्थ्यादिति वीर्यवति। भे-
षजौषधभेषज्यमित्यमरः। अतो अस्याः वचनं ग्राह्यमिति भावः। श्लेषालंकारः॥ ५॥ सत्यप्येवं-
विधमपि एतद्वचनं मह्यं न रोचते किं करोमीत्याह। इयमिति। हे राजन् इयं भारती द्रौपदीवा-
क्यं भवते पि रोचतां प्रियतां स्वदतामित्यर्थः। किंलक्षणा भारती। रुचिरार्था रुचिरो मनोहरो महि-
तो वा अर्थो यस्याः सा रुचिरार्था। संपन्नार्थेत्यर्थः। मह्यं रोचते भवते पि रोचतामित्यर्थः। यतो
किंलक्षणाय भवते। इष्टगुणाय इष्टाः अभिमताः गुणाः यस्य अ सो इष्टगुणः तस्मै इष्टगुणा- ॥२१॥
य गुणग्राहिणेत्यर्थः। रुच्यर्थानां प्रियमाण इति चतुर्थी। बालादीनामपि हितवचनं ग्राह्यं कु-
र्यादिति भावः। तथापि अबलावचने कास्वतंत्रा हा न नु वितर्के। विपश्चितः पंडिताः वचने

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः

वचने विषये वक्तृविशेषनिस्पृहाः वक्तॄणां विशेषः वक्तृविशेषः तस्मिन वक्तृविशेषे स्त्रीपुंसा
दिलक्षणे। वक्तृविशेषे निस्पृहाः निर्गतास्पृहा येभ्यः ते निस्पृहाः निरास्थाः किंलक्षणाः वि
पश्चितः गुणग्राह्याः गुणानां ग्राह्याः गुणग्राह्याः गुणपक्षपातिन इत्यर्थः आबालादेरपि सुभा
षितं ग्राह्यमिति न्यायादिति भावः। अर्थांतरन्यासोलंकारः विद्वान्विपश्चिद्दोषज्ञ इत्यमरः॥
॥५॥ संप्रतिस्वयमुपालभते। वतस्त्वपीति। हे नृप ते तव मतिबुद्धिः क्व पंथ अवसीदति कथं
नश्यति न युक्तमिति भावः। किंरूपा विपर्ययं वैपरीत्यं एत्या अविवेकरूपं प्राप्ता किंल
क्षणा मतिः वत स्वपि विद्यासु रूढिमागता प्रसिद्धिंगता विख्याता। पुनः किंलक्षणा मतिः अ
एव विवेकिनी सदसद्विवेकवती। का इव करिणी वा यथा करिणी हस्तिनी कं पंथ्यं कर्दमे
प्राप्य अवसीदति नश्यति पुनर्न निस्सरति। एतदयुक्तं तवेति भावः। वत स्वित्विद्या आह।
आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिश्च शाश्वती। विद्या ह्येताश्चतस्रश्च लोकसंस्थितिहेतवे।
इति कामंदकः। चतुर्णां विद्यानां लक्षणमाह। आन्वीक्षिकी तर्कविद्या। त्रयी वेदत्रयी। वार्त्ता कृ
षि गोरक्षा वाणिज्यादि दंडनीतिः नीतिशास्त्रं। चतुर्णां विद्यानां प्रयोजनमाह। आन्वीक्षिक्यां
त्वविज्ञानं धर्माधर्मौ त्रय्यां स्थितौ। अर्थानर्थौ तु वार्त्तायां दंडनीत्यां नयानयौ। उपमालंकारः

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टो तस्य तयोः संसृष्टिः। किन्नच्छिन्नं येनेत्यनुपालभते इत्यादि॥६॥ विधुरमिति। हे युधिष्ठिर पौरुषं पुरुषव्यापारः च
यि अवसीदति नश्यतीत्यर्थः। अतः परं अतोन्यत् अधिकं किं विधुरं विकष्टं न किंचिदित्यर्थः। विधुरं कष्टवि
श्लेषयोरिति वैजयंती। किल हतो चयि। परैः शत्रुभिः इमां ईदृशीं दशां अवस्थां गमितेनापि ते। किं लक्ष
णां दशां। अवगीतां गर्हितां। नंदितां। अवगीते वनिवादेऽनुक्रुष्टे वगर्हिते इति विश्वः। किल हतां यो स
षां। यत् यस्मात्कारणात् सुरेष्वपि संभावितवृत्तेः। सुरेष्वपि इंद्रादिभिः देवैरपि संभावितवृत्तिः। सं
भाविता बहुमता वृत्तिः प्रसरो यस्मिन् तत् संभावितवृत्ति। अथवा निश्चितसद्भावः क्वापि न व्य
भिचरतीति पौरुषमिति पौरुषाधिकस्य दुर्दशा कष्टतरा सा चेत्पुनः शत्रुकृता स्यात् तन्महत्कष्टं तद्व
त् तदुपहत्य ये तदुक्तं। उपालभते इति। अथोपेक्षा कालत्वादियमुपेक्षा इत्याशंक्याह नायमुपेक्षायुक्तः।
काल इति तैनैवतवतां तस्मात् कद्वयेन विविनक्ति। द्विषतामिति। हे राजन् सुमेधसा सुष्ठु मेधा य
स्यासौ सुमेधाः तेन सुमेधसा विजिगीषुणा पुरुषेण द्विषां शत्रूणां गुरुरपि महानपि गरीयानपि
उदयः अभ्युदयो वृद्धिः सुमर्षणः सुखेन मृष्यत इति सुमर्षणः सुसहः उपेक्ष्य इत्यर्थः। कृत सु ॥२
सह इत्याह। यदि अस्वंततरः। अत्यंतदुरंततरः दुःखोदर्कः इत्यर्थः। शोभनोंऽतः स्वंतः अतिश
येन स्वंतः स्वंततरः न स्वंततरः अस्वंततरः शोभनोंऽतो न भवेत् तदा उपेक्ष्य इत्यर्थः। अथव

कुंतदे

© Dharmartha Trust J&K. Digitized by eGangotri

द्विषतां शत्रूणां महतामपि परिक्षयः विनाशः स्यादेवं स्थानस्तु मर्षणे नोपेक्षणीयः किं लक्षणः परिक्षयः
फलसंपत्प्रवणः फलसंपत्या प्रवणः फलसंपत्प्रवणः उन्मुखनेङ्गवति। उदयोन्मुखो भवतीत्य
न्यथा उपेक्ष्य इति भावः। नक्षुद्रं यं इति। एवं प्रतिकार्यः नव क्षयः इति एवोपेक्ष्याः किं तु स्वंतन्नास्वंतवो
न्यां उमारम्भावपि प्रतीकार्य उपेक्षौ वमनवत इत्यर्थः। किं लक्षणो नस्तु मेधसा भूतिमिच्छताः धी
मता वतीमेधा इत्यमरस्तु प्रियेत्यर्थः॥ ८॥ अथ तयोरपि मध्ये एकतरस्योदयक्षययोर्गतिमुक्त्वा
इदानीं युगपत्परिक्षयागमे गतिमाह। अविरेणेति। नतीरतमनेनेति नतीकुशलाः पुमानुपेक्ष
ते उपेक्षां कुरुते उदासीनस्तिष्ठतीत्यर्थः। किंलचापरस्य शत्रोः क्षययुक्तिं क्षययोगं अविरेणाशु
शुशीघ्रं भाविनीं विगणय्य विचार्य। किं लक्षणां क्षययुक्तिं स्वयसीमहतीं कुरंतोत तथा वश्यात्मनः स्व
स्य क्षययुक्तिं विपरीतां विरभाविनीं अल्पीयसीं च विगणय्य विचार्येति उपेक्षपत इति संबंधः। च
स्य क्षययुक्तिं विपरीतां उक्तवैपरीत्यं परस्य क्षययुक्तौ अल्पीयस्यां सत्यां स्वस्य च क्षययुक्तौ भूय
न्यथा तत्प्रतीकारं कुरुते। उक्तवैपरीत्ये परस्य क्षययुक्तौ अल्पीयस्यां सत्यां स्वस्य च क्षययुक्तौ एवं
स्यां सत्यां तत्प्रतीकारं तस्याः क्षययुक्तेः प्रतीकारं नाशं अविरेण कालेन आशु शीघ्रं कुरुते। एवं
वसति यदा शत्रोरुदयः स्वस्य च अतिपरिक्षयः यथास्माकं तदा किं वक्तव्यो सघः प्रतीकारः कर्तव्यः
इत्यर्थः सिद्धमनुसंधेयं॥ ९॥ तथाप्युपेक्षा यां मनिष्टमावष्टे॥ अनुपालयतामिति। पुनः किम्

© Dharmartha Trust J&K. Digitized by eGangotri

९३

वाचेत्याह। हे राजन् श्रियः राज्यसंपदः महीभुजो राज्ञो अविरात् शीघ्रं अपयांति। गच्छंति। ननु हंति। कस्मा
दिव। उत्प्रेक्षते। जननिर्वादभयादिव। लोकापवादादिव। यथासत्यः स्त्रियः लोकापवादभीतेः पलाय्य
गच्छंति। तद्वदित्यर्थः। किंलक्षणानां महीभुजां। अनीहया अनुत्साहेन आलस्येन द्विषतां शत्रूणां
ग्र प्रभुशक्तिं कोशदंडजं तेजः अनुपालयतां उपेक्षमाणानां। किंलक्षणां प्रभुशक्तिं। उदेष्यतीं वर्द्धमा
नां। निःकृष्टपुरुषानुरागात् लोकापवादभयादिवेति हेतूत्प्रेक्षा अपयांति। अपसरंति। यथाह कामं
दकः स्त्रीभिः षंढ इवास्त्रीभिर् निरलसः परिभूयत इति। अतः पराक्रमः कर्त्तव्य इत्यर्थः। सत्वतापः प्र
भाव स्वयंतेजः कोशदंडजमित्यमरः॥१०॥ क्षययुक्तमिति। ननु परिक्षीणः कथं प्रबलं अभियुंजी
तत्राह॥ पुनः किमुवान्नेत्याह। हे राजन्। प्रजाः प्रकृतयः लोकाः नृपं राजानं प्रणमंति। अभिवं
दंति॥ अनुसरंतीत्यर्थः। किं कुर्वंतं नृपं। क्षययुक्तमपि परिहीयमानमपि तथा क्षीणमपि स्वभावजं
क्षात्रं धाम तेजः वहंतं दधतं। पुनः किंलक्षणं नृपं। विरुद्धये वृद्ध्यर्थं उपस्थितं उद्युक्तं उत्साहमा
नमित्यर्थः। पुनः किंलक्षणं नृपं। अतएव अनपायं। अविनाशं वर्द्धिष्णुमित्यर्थः। किंलक्षणं धा
मशिवं। सर्वलोकाह्लादकं। कमिव। प्रतिपच्चंद्रमिव। यथा प्रजाः लोकाः प्रतिपच्चंद्रं द्वितीया ॥२३॥
चंद्रं नमंति नमस्कुर्वंति। किंलक्षणं चंद्रं। स्वभावजं स्वकीये धाम तेजः प्रकाशं दधतं वहंतं॥

© Dharmartha Trust J&K. Digitized by eGangotri

पुनः किंलक्षणं दंडं। द्वययुक्तमिति। तथा वीणामपि। पुनः किंलक्षणो दुंडः। उच्छ्रितं उदितं। किमर्थं विव
द्धये। वृद्ध्यर्थं। पुनः किंलक्षणं दंडं। अनपायं वर्द्धिष्णुं किंलक्षणं धर्मनिश्चितं। सर्वो कामादकं। प्रतिपन्न
लक्षणं द्वितीयोपलक्षणार्थं। प्रतिपदितस्याद्दृश्यचात् द्वितीया वंडउच्यते। द्वौ स्यात्मनुत्साहः
कार्यसिद्ध्ये निदानमित्यर्थः। क्रियं हि संततो ... दुर्बलोपि समाप्नोति इति कामंदकः ॥११॥ नि
नु प्रभुशक्तिरहितस्य जनस्य उत्साहः कुत्रोपयुज्यते इत्यत्राह। आश्रम भवेति। पुनः किमुवावेत्याह। हे
राजन् खलु इति निश्चितं नयः नीतिः कोशदंडयोः प्रभवः उत्पत्तिस्थाने कोशश्च दंडश्च कोशदंडौ त
योः कोशदंडयोः कोशो राशिरर्थौघः भांडागारं दंडश्चतुरंगसैन्यं तयोः प्रभवः प्रभवत्यस्मादिति प्रभ
वः उत्पत्तिस्थानं कारणमित्यर्थः। किंलक्षणो नयः ततपंचांगविनिर्णयः ततकर्मणामारं
भोपायः पंचवतानि अंगानि सर्वांगानि पंचांगानां विनिर्णयः पंचांगविनिर्णयः ततः पंचांगवि
निर्णयो यस्य सः ततपंचांगविनिर्णयः। हे राजन् सः नयः निधेयपदेषु कार्येषु ... तांद्वि
... अनुसरति। मंत्रस्यापि मूलमुत्साहः उत्साहानुलायां प्रभुशक्तेः मूल
प्रकारि वं उत्साहं अनुरुध्यते अनुसरति। मंत्रस्यापि ... ततः तस्यापि प्रभुशक्तेः नि
मिति किमु वक्तव्यं अतः स एव न्यायस्थानीयः यतो न केवलं मंत्रयतः तस्यापि ... अनुरुध्य
रूत्साहस्य न किंचित्सिध्यति। कद्वल्लो कद्वायधात्रष्यादि ... नो लोकनियतिं दैवं अनुरुध्य

© Dharmartha Trust J&K. Digitized by eGangotri

॥कि॰टी॰
॥२५॥

२५

त। अनुसरति। नियतिः नियमे दैवे च इति विश्वः। कोशस्त्री कुड्मले खड्गपिधानेर्थौघदिव्ययोरित्यमरः॥ दंडो
स्त्री शासने राज्ञां हिंसायां कुड्मले धने इति वैजयंती। कर्मणामारंभोपायः। पुरुषद्रव्यसंपत् देशका
लविभागः विनिपातः प्रतीकारः कार्यसिद्धिश्चेति पंचांगानि यथाह कामंदकः। सहायसाधनोपायवि
भागो देशकालयोः विनिपातप्रतीकारः सिद्धिः पंचांगमुच्यते॥१२॥ मनुस्योत्सारो विपातः निःसहाय
स्य तत्तर्हितस्य द्रव्यस्य कथं सिद्धिरित्याह॥ अभिमानेति। हे राजन् मनस्विनः धीरस्य पुरुषस्य आत्म
पौरुषं स्वपुरुषाकार एव आलंबनं मतं सहकारिमतमिष्टं। केवलं स्वपौरुषाकार एव प्रधा
नमित्यर्थः। किं पुरुषादिसैन्यैः सहायैः शूराणामिति भावः। किंलक्षणं आत्मपौरुषं। विनिपातनिव
र्तनक्षमं विनिपातस्य अनर्थस्य निवर्तनं प्रतीकारः तत्र क्षमे समर्थे। यथा कश्चित् उत्तुंगं
पर्वतमारोहयतः पुरुषस्य किंचित्पतनप्रतिबंधकं अनुवरहस्तादिकं आलंबनं भवति। तद्वदि
त्यर्थः। किंलक्षणस्य मनस्विनः। अभिमानवतः। अभिमानोऽस्यास्तीति अभिमानवान् तस्य अ
भिमानवतः मानधनस्येत्यर्थः। पुनः किंलक्षणस्य मनस्विनः। पदं स्थानं राज्यादिकं आरुरुक्षतः।
आरोढुमिच्छतः। प्राप्तकामस्य। किंलक्षणं पदं इष्टं प्रियं। पुनः किंलक्षणं पदं। उच्चैः उन्नतं। पौ ॥२५॥
रुषं विना नान्योपायो शत्रून्विजेतुं। विनिपातोऽनर्थमित्यर्थः॥१३॥ पौरुषानंगीकारे दोषमा

© Dharmartha Trust J&K. Digitized by eGangotri

मा हि॥ विपदेति। हे राजन् विपदः आपदः आविक्रमं पुरुषं अभिभवंति पौरुषहीनं जनं पराभवंति।
तिरस्कुर्वंति। हे राजन् आयतिः उत्तरकालः तस्य जनस्य शोभनो न भवतीत्यर्थः। किंबहुष लो
तरं। निरायतेः आयतिरहितस्य आसन्नत्वं यस्य पुरुषस्य लघुता अगौरवं नियतं। अवश्य
भाविनी। न कश्चिदेनं आद्रियते इत्यर्थः। किंबहुना हे नृप अगरीयान् लघीयान् श्रियः लक्ष्म्याः पदं
आस्पदं आश्रयो न भवति। यद्वा नृपश्रियः इत्येकपदं। तत्पक्षे अगरीयान् लघीयान् नृपश्रि
यः राजलक्ष्म्याः पदं आस्पदं न भवति। तस्मात्पौरुषं मे कर्त्तव्यमेवेत्यर्थः। अत्र पूर्वपूर्वस्याविक्र
मत्वात् आदेरुत्तरोत्तरं विपदादिके प्रतिकारणत्वात् कारणमालेख्योऽलंकारः तथा च सूत्रं पूर्व
पूर्वस्योत्तरोत्तरहेतुत्वे कारणमालेति लक्षणं। अत्र उपसर्गप्रक्रमभंगदोषः तदुपपत्ते विक्र
हाति॥१४॥ फलितमाह तदिति॥ तत्तस्मात्कारणात् उपेक्षायां दोषसंभवात् हे राजन्त्वं यथाव्य
वसायबंधुतां उद्योगबंधुतां मृत्युतां अवलंब्य आश्रित्य अलंपूर्ये तां अवलंबनेन अलं
मित्यर्थः। व्यवसायस्य उद्योगस्य बंधुता व्यवसायबंधुता तां। व्यवसायबंधुतां उद्योग
तां बंधुमित्यर्थः। किंलक्षणां व्यवसायबंधुतां उन्नतेः उदयस्य प्रतिपक्षं अंतरायमित्यर्थः
उद्योगरहितस्य पुंसः उदयो न भवतीत्यर्थः। तथा हि हे राजन् समृद्धयः संपदः विषादि

© Dharmartha Trust J&K. Digitized by eGangotri

नसमं अनुत्साहेन सार्द्धेन निवसंति ॥ नतिष्ठंति। किंलक्षणाः सद्धेमेयः पतः पराक्रमाश्रयाः। प
राक्रमः पौरुषं आश्रयः कारणं यासां ताः पराक्रमाश्रयाः हे राजन् पौरुषसाध्याः संपदः न तु विषा
दसाध्याः उभयोः सहानवस्थानविरोधसदित्यर्थः। अत्र वैधर्म्येकार्यकारणरूपोर्थांतरन्यासो
25 लंकारः॥१५॥ ननु सुमयः प्रतीक्ष्यतां किं नो वेगेन तत्राह॥ अथवेदिति। अथ इति पक्षांतरे
हे राजन् त्वया यदि अवधिसमयः कालः प्रतीक्ष्यते त्रयोदशवर्षाणि पर्यंतं त्वया चेत् तूष्णीं स्थी
यते तर्हि धृतराष्ट्रसुतेन दुर्योधनेन नरेंद्र संपदो राज्ञसंपदः कथं सुत्यजाः भविष्यंति सु
खेन न त्याज्याइत्यर्थः। किं तु वा। चिरं चिरकालं आस्वाद्य त्रयोदशवर्षाणि अनुभूय भुक्त्वा इ
त्यर्थः। अयमर्थः। आ आस्वादेन दुर्योधनेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यक्ष्यंते अ
तस्त्वावधिप्रतीक्षणं समयपालनं व्यर्थमित्यर्थः। किंलक्षणेन धृतराष्ट्रसुतेन आविष्कृतकु
टिलवृत्तिना। आविष्कृता प्रकटीकृता कुटिला वृत्तिः कपटव्यापारो येन असौ आविष्कृतकुटिल
वृत्तिः। तेन नरेंद्रसंपदः इति पदद्वयं कर्तव्यं हे नरेंद्र इति ॥१६॥ अथ यदि देववशात् सः
दुर्योधनः स्वयमेव संपदो दास्यति तथापि तव कर्धीरो नयमहीति तत्राह॥ द्विषतेति। हे रा ॥२५॥
जन् अथवा यदि वै त्वया पुनरपि आत्मनः पदं राज्यं लभ्यते किंलक्षणां पदं। द्विषन्मा
त्या

© Dharmartha Trust J&K. Digitized by eGangotri

शत्रुणा दुर्योधनेन स्वयमेव निहितं प्रत्यर्पितं दत्तमित्यर्थः। तर्हि जननाथ हे राजन् तव अनु-
जन्मनां भीमादीनां भुजैः हतं। अलंघूर्यतां। अनु पश्चात् जन्म उत्पत्तिर्येषां ते अनुजन्मानः
तेषां अनुजन्मनां भुजैर्न किंचित्साध्यते इत्यर्थः। किंलक्षणैः भुजैः। आविष्कृतपौरुषैः प्र-
कटीकृतपराक्रमैः। आविष्कृतं प्रकटीकृतं शत्रुषु पौरुषं पराक्रमो यैस्ते आविष्कृतपौरुषाः
तैः। अयमर्थः। राज्यदानादानयोः शत्रूणामेव स्वातंत्र्यं। अस्मात् तु जनानां निष्कारणमेव
मेवा क्षत्रियस्य विजितमिति शास्त्रात् त्वत्तो वराज्यं ग्राह्यमिति भावः। हृतमिति प्रतिषेध-
र्थमव्ययात् हृतमिति वारणनिषेधयोः॥१७॥ मदसिक्तेति। ननु सामैव कार्यसिद्धौ किं दारुणे-
ण। यथाह मनुः। साम्ना दानेन भेदेन समस्तैरथवा पृथक् विजेतुं मतेतारीन्न युद्धेन प्रयते
कदाचन। तत्किमाग्रहेण मैत्र्यां भाव्यमित्याह। हे राजन् मृगाधिपः सिंहः। करिभिः गजैः वर्त्तयते त
वृत्तिं करोति जीवतीत्यर्थः। किंलक्षणैः करिभिः स्वयं हतैः आत्मनैव व्यापादि-
तैः पुनः किंलक्षणैः करिभिः मदसिक्तमुखैः मदेन दानोदकेन सिक्तानि आर्द्राणि मुखानि
येषां ते मदसिक्तमुखाः तैः। खलु इति वाक्यालंकारे। हे राजन् महान् पुरुषः अन्यतः अन्य-
स्मात् पुरुषात् भूतिं वृद्धिं अभ्युदयं न इच्छति न अभिलषति। किं कुर्वन् तेजसा स्वप्र-

© Dharmartha Trust J&K. Digitized by eGangotri

भावेन तगतविस्मं लङ्घयन् लघु कुर्वन् अतितुङ्गं कुर्वन्निति तात्पर्यः । तेजो बले प्रभावे च ज्योति
ष्यर्चिषि रेतसीति वैजयन्ती । खलु न हि तेजस्विनः पुरुषस्य परायत्तवृत्तित्वं युक्तम् । मनुष
वनं तु अस्मूरनिषयं । अत्र विषुणो वस्तुमात्रो सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलं
कारः ॥१८॥ ननु पुरुषार्थस्य पुरुषस्य कोऽलाभः उपायान्तरैस्तु न तथेत्याशंक्याह ॥ अभिमानेति ।
ननु इति निश्चिते हे राजन् एवं लक्षणस्य पुरुषस्य लक्ष्मीः संपत् आनुषंगिकं फलं
भवति । अनुषंगाद्दागतं आनुषंगिकं । अनिच्छया प्रविष्टमिति कोऽर्थः । अल्पं फलं भवति ।
किं लक्षणस्य पुरुषस्य । अभिमानधनस्य । अभिमान एव वैरिनिपातनमेव धनं यस्य
सः मानधनः तस्य पुनः किं लक्षणस्य तस्य । असुभिः प्राणैः यशः स्थिरं चिन्वतः । चिनुञ् चय
ने चिन्वतः । किं लक्षणं यशः स्थास्नु स्थिरं । किं लक्षणैः असुभिः गत्वरैः गमनशीलैः पुंसि
भूम्यसवः प्राणा इत्यमरः । किं लक्षणा लक्ष्मीः अचिरांशुविलासचंचला । अचिरं अ
प्रावोधस्याः सा अचिरांशुः अचिरांशोः विलासः अचिरांशुविलासः अचिरांशुविला
सवत् चंचला । अचिरांशुविलासचंचला । अचिरांशुः विद्युत् तस्याः विलासः स्फुर ॥२६॥
णं तद्वच्चंचला । चलेति केत्यर्थः । अत एव मनस्विनां यशरूपं सुखं फलं । अन्यदेय
स्मान्ने लक्ष्मीरिति मानिनामिदमेव श्लाघ्यम् इत्यर्थः ॥१९॥ ननु न्यूनस्य मानस्य

© Dharmartha Trust J&K. Digitized by eGangotri

तोः कथं प्राणत्यागः कर्तुं शक्यते यतो जीवन्नरो नरः भद्रशतानि पश्यन्तीत्याशंक्याह ॥ ज्वलितमि
ति । हे राजन् उन्नतो लोकः भस्मनां विभूतीनां चयं पुंजं आस्कंदति वरणोदिना आक्रमति । अ
हह कथ्यादितिभावः । हिरण्यरेतसं वह्निं नास्कंदति वरणोदिना कोपि नाक्रमति । दाहकत्वात्
स्यतिभावः । हिरण्यं सुवर्णं रेतो वीर्यं यस्य सः हिरण्यरेताः तं । किंलक्षणं हिरण्यरेतसं
ज्वलितं । ज्वलंतमित्यर्थः । अतः हेतोः अतः कारणात् मानिनः अभिमानवंतः पुरुषाः अभि
भूतिभयात् परिभवभयात् असूनेव प्राणानेव सुखं अनायासेन यथा तथा उज्झंति त्यजंति
न धाम तेजो नोज्झंति न त्यजंति । प्राणानां त्यागेन तेजस्त्यागेन परिभवो न विद्यतीति भयादित्य
र्थः । मानहानिकरणात् जीवनात् तेजस्विनां मरणमेव वरमित्यर्थः ॥ २० ॥ अथवा किमत्र
प्रयोजनं चिंतया किंतु तेजस्विनामयं स्वभावो यज्जिगीषुत्वमित्याह ॥ किमितीति । हे राजन्
मृगाधिपः सिंहः पयोधरान् मेघान् प्रार्थयते अभियाति सन्मुखं गच्छति तत्र भयः किं फलं अ
पर्यस्य प्रयोजनं न मपेक्ष्य याति नेत्यर्थः । धरंतीति धराः । पयसो धराः पयोधराः तान् पयोध
रान् किंलक्षणान् पयोधरान् ध्वनतः गर्जतः । याच्ञायामभियाने प्रार्थना कथ्यते बुधै
रिति केशवः । हे राजन् खलु इति निश्चितं महीयसः महत्तरस्य पुरुषस्य साधिक्तता तिः स्व

© Dharmartha Trust J&K. Digitized by eGangotri

९७

प्रभावः यया प्रवृत्त्या स्वप्रभावेन अन्यसमुन्नतिपरवृद्धिं न सहते न क्षमते। अन्येषां परेषां
शत्रूणां समुन्नतिः अन्यसमुन्नतिः तां। महतां परमं गएव महतामनुरूपार्थः॥२१॥ उक्तप्रयोजनं नि
गमयति। कुरु तदिति। हे नृप तत्तस्मात्कारणात् पराक्रमे एव पौरुषे एव मतिं बुद्धिं कुरु। विक्रम
मेव। अंगीकुरु न तूपायांतरमित्यर्थः। किं कृत्वा तमः मोहं ज्ञानेन निर्धूय निरस्य त्यक्त्वा। किं
लक्षणं तमः प्रमादजं प्रमादोद्भवं न विक्रमस्य वैफल्यमित्याह। एतत्त्वद्यमानां ध्रुवं नि
श्चितं अवेहि जानीहि तत्किं नस्यमाणामित्याह। हे राजन् विद्विषां शत्रूणां विपत्तयः आपदः
चेदनुत्साहहताः तवानुत्साहेन अव्यवसायेन अनुद्यमेन प्रतिबद्धाः। अहो निःशंकं प्रवर्त
यस्वेति नाथा प्रागेव विघटंते इति भावः। ध्रुवं नित्यानित्यत्वे इति शाश्वतः॥२२॥ न वा समावं शत्रू
न्तपरान् वशं का कार्यं त्याह। द्विरदानिति हे नृप द्विषां शत्रूणां मध्ये कः द्विषत् तव अनुजान्
बंधून् रणे संग्रामे सहेत। तां सो दुःशंकु यात न कोपीत्यर्थः। अतो निःशंकं प्रवर्त्यस्वेति भावः
किंलक्षणान् अनुजान् वक्तुरः। पुनः किंलक्षणान् अनुजान् दिग्विभावितान् दिक्षु विभावि
ताः विख्याताः दिग्विभाविताः तान् दिग्विभावितान् दिक्षु प्रसिद्धानित्यर्थः। कानिव। वक्तुरंसैः ॥२१॥
द्विरदानिवादिगजानिव। किंलक्षणान् द्विरदान् दिग्विजातान् दिग्दुज्ञातान्। पुनः कानि

© Dharmartha Trust J&K. Digitized by eGangotri

।या। वनुरस्तोयानिधीनि वा समुद्रानि वा। किल त्वलान् तोयनिधीन् आयतान् दीर्घान् महत
इत्यर्थः अतिबलत्वेन गंभीरत्वेन नवति। पुनः किल त्वलान् अनुज्ञान्। शतमन्युतेजसः। शत
मन्योरिंद्रस्य तेज इव तेजो येषां ते शतमन्युतेजसः। तान् पुनः किल त्वलान् अनुज्ञान्। आ
यतः सन्मुखं आगच्छतः इत्यनेन स्मूरचवं मालोपमा॥२३॥ आशीर्वादव्याजेन फलितमाह॥
ज्वलिततति॥ यैन् परिपुनारीनयनांबुसंततिः वैरिवनिताश्रुप्रवाहः जातवेदसः वह्नेः शमं
शांतिं विदधातु करोतु। रिपुणां नार्यः रिपुनार्यः रिपुनारीणां नयनानि। रिपुनारीनयनानि।
रिपुनारीनयनानां अंबुनि रिपुनारीनयनांबूनि रिपुनारीनयनांबुनां नयनोदकानां सं
ततिः धारा। किल त्वला रिपुनारीनयनांबुसंततिः। शिवेतरा। शिवात् इतरा शिवेतरा अमं इमंग
गला। किल त्वस्य जातवेदसः। वैरीजनस्य शत्रुसमूहस्य। पुनः किल त्वस्य जातवे
दसः। सततं सर्वदा तव चेतसि हृदये ज्वलतः प्रज्वलतः क्रोधाग्नेरित्यर्थः। वैरीजनस्य क्रोधा
ग्निर्वैरिवधमंतरेणाशांत्यसंभवात् अवश्यं तद्वधस्तु याकर्तव्यः यथांबुसिक्तेनाग्निः शा
म्यते तथा शत्रुवधेन क्रोध इत्यौपम्यं गम्यते॥२४॥ इति दर्शितनि॥ महीपतिः राजा युधिष्ठिरः मरु
तः वायोः सुते भीमसेने चयितुं अनुनेतुं प्रासादयितुं उपचक्रमे प्रचक्रमे। कस्मिंचाद्विरदमिवायथा

© Dharmartha Trust J&K. Digitized by eGangotri

कि.टी.
॥२८॥

28

कश्चित्तु मानद्विरदं गेसौ वयितुं प्रासादयितुं प्रवर्त्तसे। किंलक्षणो द्विरदो। दुःष्टं मत्तो तद्वदित्यर्थः। ए
तेन भीमस्य बलमेवोक्तेन पुनः बुद्धिरस्तीति। किंलक्षणं मरुतः सुतं। इति दर्शितविक्रियं। इति
पूर्वोक्तप्रकारेण दर्शिता विक्रिया विकारो वचनारंभको येन असौ इति दर्शितविक्रियः तं। पु
नः किंलक्षणं मरुतः सुतं। क्रोधपरीतमानसं। क्रोधेन कोपेन परीतं आक्रान्तं व्याप्तं मानसं
चेतो यस्य सः क्रोधपरीतमानसः तं। एतद्विशेषणद्वयं द्विरदपक्षेपि समानं। राज्ञो हि उपका
रविशेषाकोत्तया कथमप्यवश्यो जनः मसम द्विरदवशीकरणीयः न तु त्याज्य इति भावः। उ
पमालंकारः। ॥२५॥ प्रथमं तावत्स्तुत्यादिभिः प्रसादयति। अपवर्जितेति। हे भीम तव मतिः
बुद्धिः गिरां विस्तरे वाक्प्रपंचे प्रयते नाविमेला विशदा प्रकटा अस्ति दृश्यते। कस्मिन्निवा आ
दर्शे इवादर्पण इव। किंलक्षणे गिरां विस्तरे। अपवर्जितविप्लवे अपवर्जितः रहितः गतवि
प्लवः प्रमाणबाधो यस्य सः अपवर्जितविप्लवः तस्मिन्। अपवर्जितविप्लवे। किंतु। सप्रमाणि
के। किंलक्षणे आदर्शे। अपवर्जितविप्लवे। अपवर्जितः गतः बाह्यमलसंक्रमणो विप्लवो ॥२
यस्य सः अपवर्जितविप्लवः तस्मिन्। पुनः किंलक्षणे गिरां विस्तरे। अत एव शुचौ। सो दृशशुचौ।
किंलक्षणे आदर्शे शुचौ। लोहस्वच्छे। पुनः किंलक्षणे गिरां विस्तरे। अत एव हृदयग्राहिणि

© Dharmartha Trust J&K. Digitized by eGangotri

मनोहरे। आदर्शेऽपि। पुनः किल शलोगिरां विस्तरे। मंगलास्पदे। मंगलस्थाने। हितार्थप्रतिपादकत्वात्
पुनः किल शलो आदर्शे मंगलास्पदे। अयस्करे मंगलस्थानेऽब्द तथा चोक्तं शेवनं वंदनं हेममृदंगंद
दर्पणोऽत्र तानि गुरुमङ्गितथा सूर्यप्रा। ततः पश्येत्सदा बुधः इति पुराणात् मृदंगं मृदंगध्वनिं श्रुत्यात्र
अवाचां वैशद्याद्दिवमतिवैशद्यमनुमीयते। तत्पूर्वकं चात्रस्येत्यर्थः अनुमानप्रामाण्ये तापमालंका
रः। श्लेष इति केचित्। एकस्य वाक्यस्यानेकार्थप्रतीतिरिति। दर्पणो मुकुरादर्श इत्यमरः। विस्तरो वि
ग्रहो वासः स तु शब्दस्य विस्तर इत्यमरः॥२६॥ स्फुरतानेति। उपपत्तिरिति। अथ युग्मेनाह। हेमी
नत्रनीदृगाशयः इदं वक्तुमारंभवनं ईदृकू हृद्गुणोपेतं दात्रयुअभिप्रायः। प्रसमं बलात्कु
कंडनः उपक्रमेत उपक्रमं कुर्वीतान कोपीत्यर्थः इदं वक्तुं उपक्रमितेवनास्ति वक्ता तद्गुरापास्तयु
क्तिभावः। न ईदृगाशयः इदं दात्रयुक्त्याभिप्रायो यस्य सः अनीदृगाशयः तदेवाह। हेमीमय
दैः सुश्लिष्टगतशब्दैः स्फुरता विशदार्थेतानअपात्रतानत्यक्ता। ऊहित्यर्थप्रतीतेः तर्हि अर्थगौर
वं न भविष्यतीत्याह। अर्थगौरवे अर्थाधिक्येन स्वीकृतमितिना। अपितु स्वीकृतमेवमहार्थत्वात्
हेमीमयचयापदानां अनेतरवाक्यानां पृथगर्थताभिन्नार्थता अपुनरुक्तार्थता रक्षिता। ऋवेत्यर्थः न
अन्यथार्थोदीर्हि वाक्यानां परस्परं हि श्लिष्यता मैनास्तीत्यर्थः। तथाचाह हेमीमयचयाङ्कविदपि सामर्थ्ये
अन्वययोग्यं चं गिरामन्योन्यसाकांक्षत्वेन वअपोहितेन वर्द्धितानत्यक्तमित्यर्थः अन्यथा
दशदाडिमादिशब्दवदेकवाक्यतास्यात्॥२७॥ हेमीमचयाबलात्तबलमाश्रित्य उपपत्तिः

© Dharmartha Trust J&K. Digitized by eGangotri

कि॰ टी॰
॥२५॥

21

युक्तावुदाहृतावुक्ताकथितेत्यर्थः। पराक्रमपन्न एव श्रेयान् इति युक्तिरुक्तेत्यर्थः। बलमाश्रित्य इति
त्यवृत्तोपेपयंवमी। युक्तमेवैतन्महावीरस्येति भावः॥ तथा वदन् भीमस्त्वया अनुमानेन च या युक्त्या
आगमो नीतिशास्त्रं न च्युतः न हतः किन्तु आगमाविरुद्धमेवोक्तं अन्यथा तद्विरोधादनुमानस्यैव
आभासत्वं स्यात्। आगमभङ्गप्रसङ्गादिति भावः। अभिप्रायः छन्दः आशय इत्यमरः॥२५॥ यदि सा
धूर्त्तं तर्हि तथैव क्रियतामित्याशंक्याह॥ अवितृप्ततयेति। हे भीम यद्यपि त्वया सम्यक् निर्णीय
उक्तं विचार्य उक्तं तथापि मे मम हृदयं निर्णयमेव गाहते। धावति अनुसरति। अवेत्तु तदित्यर्थः।
अथापि निर्णयस्यानुदयादिति भावः। कया अवितृप्ततया। असंतुष्टतया। अथापि संशयच्छेने
त्यर्थः। निर्णयानुदये हेतुमाह। हे भीम विशेषसंपदः अवान्तरभेदन्यमानः बहुवाक्यानि विधेयेषु
संधिविग्रहादिकर्त्तव्यपदेषु स्थानेषु प्रयुक्ताः सत्यः सुखं यथा स्यात्तथा अक्लेशेन पुरुषान्
अवसाययितुं स्वस्वस्वरूपं स्वयमेव शीघ्रं प्रत्याययितुं विश्वासं उत्पादयितुं न क्षमाः न सम
र्थाः भवन्ति। अनेकवाक्यवत्तान्निर्णयानुदयः संधिविग्रहादिषु पुरुषस्य। विधेयमात्रस्तु गमयेदपि
तद्विशेषाणां सौक्ष्म्यात् बाहुल्यात् दुर्ज्ञानत्वात्। अथापि निर्णयकांक्षेति तात्पर्यार्थः॥२६॥ स
हसेति। विशेषपरिज्ञानमंतरेणैव प्रवृत्तिरसक्ता। किं विशिष्य ज्ञानेनेत्याह। पुमानिति शेषः हे
भीम पुमान् पुरुषः क्रियां कृत्यं कार्यं सहसा अविमृश्य अविचार्य न विदधीत न कुर्वीत। सह ॥२६॥
सेत्याकस्मिकाविमृश्ययोरिति गणव्याख्यानेऽस्वरादिपाठादव्ययं कुतो हेतोः यतः कारणात् अ
विवेकः अविमृश्यकारित्वं पर [illegible] नां पदं स्थानं कारणमित्यर्थः। पदमि

© Dharmartha Trust J&K. Digitized by eGangotri

विशलिंगं। व्यतिरेकेणोक्तमर्थमन्वयेनाह। हे भीम संपदः समृद्धयः श्रियः विमृश्यकारिणं पुरुषं तं स्व
यमेव वृणते भजंते। वृङ् संभक्ताविति अस्य वृङ्ग्रहणे रूपं। विमृश्य विचार्य करोतीति विमृश्यकारी तं।
तस्मात् विमृश्यैव प्रवर्त्तितव्यमित्यर्थः। किंलक्षणाः संपदः। गुणलुब्धाः गुणगृध्नवः गृधि अभि
कांक्षायां॥३०॥ ननु साहसिकस्यापि कार्यफलसिद्धिर्दृश्यते एव किं विवेकेनेत्याह। अभीति॥
हे भीम यः विजिगीषुः पुमान् विवेकवारिणा विवेकजलेन विधिबीजानि कृत्यवस्तूनि अभि
वर्षति सिंचति। विवेक एव वारि विवेकवारि तेन विवेकवारिणा। विधीयंत इति विधयः कृत्यवस्तू
नि। विधिबीजानीव विधिबीजानि। उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति समासः। किं
कुर्वन् अनुपालयन् प्रतीक्षां कुर्वन् हे भीम तु पुनः सः पुमान् सदा सर्वदा क्रियां कर्म अधितिष्ठति।
अधितिष्ठति प्राप्नोत्येव न कदाचिद्विघ्नमिव रतीत्यर्थः। किंलक्षणां क्रियां। फलशालिनीं फलं सा
धनं निष्पाद्योर्थः तेन शालते शोभते सा फलशालिनी तां। कः कामिव। लोकः शरदमिव यथा लो
कः कर्षिको जनः शरदं अधितिष्ठत्यपि प्राप्नोति किंलक्षणां शरदं फलशालिनीं फलेन सस्यादि
ना शालते सा फलशालिनी तां। लोकस्तु भुवने जने इत्यमरः। सस्यं च फलं हेतुकृते सस्यमि
त्युभयत्राप्यमरः॥३१॥ विवेकिनो नियता कार्यसिद्धिरुक्ता संप्रति इदानीं तामेव रुच्यर्थं स्तौति॥
शुचि भूषयतीति। हे भीम श्रुतं शास्त्रश्रवणं कर्तृ वपुर्भूषयति। शरीरं अलं करोति। अन्यथा अ
विद्वान्जनः शोभत इति भावः। किंलक्षणं श्रुतं सुवि। संप्रदायशुद्धमिति। हे भीम प्रशमः क्रोधस्योपशां
तिः तस्य श्रुतस्य अलंक्रिया भवति। अतिनिर्वेदनीगाणो नाम भवति। अन्यथा सति क्रोधस्फुत

© Dharmartha Trust J&K. Digitized by eGangotri

ईश्वर
॥३०॥

30

स्यनिष्फलत्वादिति भावः। पराक्रमः अवसरे सति शौर्यं बलं प्रशमाभारतो भवति। प्रशमस्य शान्तेः अ-
लंकरणो भवति। पराक्रमेण प्रशमो भातीत्यर्थः। अन्यथा सर्वैरपि परिभूयते इति भावः। सः पराक्रमः न-
यापादितसिद्धिभूषणो भवति। नयेन आपादिता नयापादिता न आपादिता वा सा सिद्धिश्च यापादित-
सिद्धिः। नयापादितसिद्धिरेव भूषणं अलंकरणं यस्य सः नयापादितसिद्धिभूषणः। नयेन नी-
त्या आपादिता विवेकपूर्विका या सिद्धिः सैव भूषणं अलंकरणं यस्य सः। अन्यथा सदसि कुसिद्धेः
काकतालीयत्वेन पराक्रमविपर्ययः स्यादिति भावः॥३२॥ विमृश्य कुर्यादित्युक्ते तत्र विमर्शो-
पायकः इत्यत्र शास्त्रमेवाह। मतिभेदेति॥ हे नीम आगमः शास्त्रं कृत्यविधौ कार्यानुष्ठानवि-
षये विवेकिनां पुरुषाणां अर्थदर्शनं कार्यज्ञानं कुरुते संपादयतीत्यर्थः॥ किंलक्षणः आगमः
स्फुरत्तः सुष्टु आभ्यस्तः पुनः किंलक्षणः आगमः। परिशुद्धः परितः सर्वत्र शुद्धः निश्चितः कइव दी-
प इव यथा दीपः जनानां अर्थदर्शनं वस्तुप्रतिभासं करोति। किंलक्षणः दीपः। स्फुरत्तः शोभनपा-
त्रस्थः पुनः किंलक्षणः दीपः परिशुद्धः सुविहितः वातादिदोषरहितः। तैलादिना निर्मलः किंल-
क्षणे कृत्यविधौ। मतिभेदतमस्तिरोहिते आच्छादिते कृत्यापरिज्ञाने। मतेः भेदः कृत्यनाशः कार्यविप्र-
तिपत्तिरित्यर्थः मतिभेदस्तम इव इति मतिभेदस्तमः मतिभेदस्तमसा तिरोहितः मतिभेदस्तमति-
रोहितः तस्मिन् मतिभेदस्तमस्तिरोहिते। पुनः किंलक्षणे कृत्यविधौ अतएव गहने। दुरवगाहे। ॥३॥
दुर्विज्ञाने। तमस्तिरोहिते कृत्यविधौ दीपः अर्थज्ञानं प्रकाशयतीति उपमालंकारः आगमः शा-
स्त्रमिति विग्रहः॥३३॥ अविचारमनुष्ठानवतः पुरुषस्य दैवकृतानर्थोपि न कश्चिदपराध इत्या-

© Dharmartha Trust J&K. Digitized by eGangotri

हास्पृहणीयेति। हे भीम एवं किंल गुणिनां पुरुषाणां विनिपातोपि देवकृतानर्थोपि देवकृतोन्न
र्थो वान्नतिः। समुन्नतेरभिवृद्धेः समः सदृशः तुल्य इत्यर्थः। सः पराभवो न भवति किंतु समुन्नति
रेवेत्यर्थः। देविकेषु पुरुषस्यानुपलभ्यमानत्वादिति भावः। किंल गुणिनां पुरुषाणां महात्मभिः म
हानुभावैः सज्जनैः चरिते अनुष्ठिते वर्त्मनि मार्गे॥ आचारे वा। मनः यच्छतां। नियच्छतां तस्मिन्मार्गे व्यव
हारतामित्यर्थः। किंलक्षणैः महात्मभिः। स्पृहणीयगुणैः। स्पृहणीयाः श्लाघ्याः ह्लद्याः गुणाः शौ
र्यादयो येषां ते स्पृहणीयगुणाः तैः। किंल गुणिनः विनिपातः। विधिहेतुः। विधिर्दैवं हेतुः निमित्त
कारणं यस्य सः विधिहेतुः पुनः किंल गुणिनः विनिपातः अत एव अनागसां अपराधमनां अहे
तुः अनिमित्तं दैवागत इत्यर्थः। विधिर्विधाने दैवे वेत्यमरः। यथाह कामंदकः। पुयत्नसम्यग्गुप
क्रांतं कार्यमिति विपर्ययं प्रसादस्त्वनुपालभ्यो दैवांतरितपौरुष इति व्यतिरेकोपमा। विनिपातो
वपातस्याद्दैवादिव्यसनेवेति विश्वः॥ २५॥ संप्रति यद्विमृश्य तदाह॥ हे भीम शिवमिति। हे भी
म। जिगीषवः विजयेच्छवः जयवांतः पौरुषाः पौरुषं पुरुषकारं पुरुषार्थं उपायेन यंति प्रा
पयंति। पौरुषमुपायेन सह योजयंतीत्यर्थः। नानिश्चितफलं कुर्वीतेति भावः। किं कृत्वा एवं वि
धं फलनिष्पत्तिं फलसिद्धिं विगणय्य। फलवचं निश्चित्येत्यर्थः। किंल गुणां फलनिष्पत्तिं।

© Dharmartha Trust J&K. Digitized by eGangotri

कि॰टी॰
॥३१॥

31

गरीयसीं। प्रभुतां महतीं। पुनः किंलक्षणां फलनिष्पत्तिं। अदूषितायतीं। अदूषिता अहिताः आय
तीः उत्तरकालो यस्याः सा अदूषितायतीः तां। अहतोत्तरकालां शुभंतामित्यर्थः। किंलक्षणां पौ
रुषं शिवं। अनुकूलं। सानुकूलां कर्तुः फलदायीत्यर्थः। पुनः किंलक्षणां पौरुषं। अपथिकं
उपाय एव अपायिकः। तं अपथिकं। किंलक्षणाः जिगीषवः। विजितक्रोधरयाः विजितः
निराकृतः त्यक्तः क्रोधस्य रयः वेगो यैः ते विजितक्रोधरयाः॥३५॥ यदुक्तं विजितक्रोध
रया इति तदावश्यकमित्याह। तिमिरं। हे भीम राज्ञां नृपेण पुरः प्रथमं तमोंधकारं अज्ञा
नं धिया विवेकलक्षणया बुध्या लंघ्या अपनेयं प्रणोद्यं निराकरणीयमित्यर्थः। किंलक्षणे
न राज्ञा। उदेतुं उदयं प्राप्तुं इच्छता। अभ्युदेतुं अभिलषता। किंलक्षणं तमोंधकारं। रो
षमयं रोषात् आगतमित्यर्थः। आगतार्थे मयट् इति मयट्। अत्र दृष्टांतमाह। यथा अंशुमता
पि सूर्येण अक्षपितप्रभया तेजसा सर्वान् निशाकृतं रात्र्या निर्हितं न्यस्तं तमो ध्वांतं
अविभिद्य अनिराकृत्य उपेत्य नोदीयते। किंतु तमो भित्वैव उदीयते इत्यर्थः। अंशु बि २
मतोप्येवंस्थितिः किमुतान्येषां इत्यपिशब्दार्थः॥३६॥ ननु क्षीणस्यैवं भवतु बली
यसस्तु रोषादेव कार्यसिद्धिर्भविष्यतीत्यत्राह। बलवानिति॥ हे भीम बलवानपि सुरोपि ॥३१॥

© Dharmartha Trust J&K. Digitized by eGangotri

यः नृपः तमसो मोहस्य अपि सर्वंकषाक्रांतिं न लभते। न निवारयति। सः नृपः सकलाः समस्ताः
शक्तिसंपदः प्रभुमंत्रोत्साहलक्षणाः तिस्रोपि शक्तयः समृद्धयः निहंति। नाशयति। किंल
क्षणस्य तमसः। कोपजन्मनः। कोपः जन्म यस्य। कोपजन्मा। तस्य कोपजन्मनः। व्यधिकरणे
बहुव्रीहिः। क इव। क्षयपक्ष इव। यथा क्षयपक्षः कृष्णपक्षः सकलाः ऐंदवीः इंदुसंबंधिनीः क
लाः हंति। नाशयति। कला तु षोडशो भागः इत्यमरः। अंधस्य जंघाबलमिव। क्रोधांधस्य लोको
त्तरमपि सामर्थ्यमपार्थमेवेत्यर्थः। अत्र कालस्य सर्वत्र कारणत्वात् क्षयपक्षस्य कलाहर
कारित्वमस्त्येव। तमसस्तु न कालविशेषं गणान्नयापि व्यपदेशः। उपमा॥१७॥ विमृश्यकारिणः
क्रियाप्रकारमा॥६॥ समवृत्तिरिति। सः मेदिनीपतिर्भूपतिः उग्रसाबलेन लोकं भुवनं
अधितिष्ठति। आक्रामति। क इव। विवस्वानिव। सूर्य इव। यथा विवस्वान्सूर्यः उग्रसा
तेजसा लोकं आक्रामति। तद्वदित्यर्थः। सः कः यः मेदिनीपतिः समवृत्तिः सन् समये सति
अवसरे सति मार्दवं मृदुत्वं मृदुवृत्तिं मुपैति प्राप्नोति। अवसरे तिग्मतां तीक्ष्णावृत्तिं तनोति
विस्तारयति। समा वृत्तिर्वर्तनं यस्य सः समवृत्तिः नातिमृदुः नातितिग्मः समवृत्तिरित्यु
च्यते। सूर्योपि समये हेमंतादौ मृदुर्भवति। तथा समये ग्रीष्मे तिग्मतां तीक्ष्णावृत्तिं तत

© Dharmartha Trust J&K. Digitized by eGangotri

32

नोति॥सूर्यो विमधाम्नः समये ग्रीष्मादौ व तिग्मवृत्तिर्नवतीति तत एव सर्वदा न मृदुवृत्तिर्नाना
ति तिग्मवृत्तिर्नाभवति तथा महीपतिः सूर्ययोः साधर्म्योपमा॥३८॥ ऋस्य प्रकारांतरक
रणदोषमाह॥ ध्वेति॥ हृ भीमस्त्रियां संपदां विरायव कुकालं परिग्रहः स्वायत्तीकरणं ध्व
दुष्टेंद्रियवाजिवश्यां ध्व॥ इंद्रियाणि वाजिन इव इति इंद्रियवाजिनः दुष्टाश्च ते इंद्रियवाजि
नश्चा दुष्टेंद्रियवाजिनः दुष्टेंद्रियवाजिनां वश्यः वशंगतः दुष्टेंद्रियवाजिवश्यः दुष्टेंद्रि
यवाजिवश्यस्य भावः दुष्टेंद्रियवाजिवश्यता। ध्वेति संबंधः। क्वापि। उभयमेकत्र न ति
ष्ठतीत्यर्थः। कुत इत्याह। द्रियस्याकारणात्ववालेंद्रियैः अजितेंद्रियैः पुरुषैः श्रियः ल
भ्याः अप्सुररक्षाः न सुखेन रक्षाः रक्षितुमशक्या इत्यर्थः। कथं चित्प्राप्तापि श्रियो पि अ
चिरा न तेषु न तिष्ठंतीत्यर्थः। चलानि चंचलानि अवशानि इंद्रियाणि येषां ते तैः किं लक्ष
णाः श्रियः शरदभ्रचलाः शरदभ्रवत् शरत्समयमेघवत् चंचलाः चपलाः पुनः किं
लक्षणाः श्रियः अत एव बहुछलाः अनेकव्याजाः बहुरंध्रा इत्यर्थः छलस्य स्खलि
तस्या जहति विघ्नः॥३९॥ कोपस्य दुष्टत्वमुक्त्वा तस्य त्यागमुपदिशति। किमसामपि
कमिति। हृ भीमसेन वतो चयाऽपां पतिः समुद्रोऽपि किं किमर्थं उत्त्वकैः अधिकः क्रियते॥ ॥३२॥

© Dharmartha Trust J&K. Digitized by eGangotri

पराजितं पुनः नउच्चैः कुर्यादित्यर्थः। किंलक्षणः अपांपतिः धीरतया धैर्येण अधरीकृतः। नीचैः
कृतः पूर्वमितिशेषः। किंलक्षणेन भवता मनसः विकारस्य क्षोभं विकारं वितन्वता। न तन्वता।
किंलक्षणस्य मनसः उपात्तरंहसः। उपात्तं प्राप्तं रंहो वेगरायेन तत् उपात्तरंहः तस्य उपात्त
रंहसः। किंलक्षणं क्षोभं असामयिकं। समयो यस्य प्राप्तः स सामयिकः न सामयिकः
असामयिकः तं असामयिकं अप्राप्तकालमित्यर्थः। धीरतयेति। धैर्यगुणेनेत्यर्थः। म
नसा निर्विकारश्च धैर्यं वितन्वता तेति नाम विशेषणं न पदार्थस्याच्चैः कारणहेतोः काव्य
लिंगमलंकारः॥ ४॥ कृतमप्यतीति। हे नाम ये पुरुषाः कृतं शास्त्रं अधिगम्यापि ज्ञात्वापि
रिपून् कामक्रोधादीन् अरीन् न विनयंते॥ न नियच्छंति। न नियमयंति। ते पुरुषाः खलु
निश्चितं अचिरात् आत्मीयसंपदां श्रियां अयशः दुःकीर्तिं जनयंति। उत्पादयंति। किंलक्ष
णं अयशः। चापलाश्रयं। चापलाः चंचलाः पुरुषाः आश्रयो आधाररायस्य तत्तत्चापलाश्रयं
आश्रयदोषाद् एव श्रियां वचनमस्थैर्यं चांचल्यं न आत्मदोषादित्यर्थः। अजितारिषड्वर्गस्य
कुतः संपदित्यर्थः। किंलक्षणान् रिपून् शरीरजन्मनः। शरीरप्रभवान् शरीरजानित्य

© Dharmartha Trust J&K. Digitized by eGangotri

कि॰ टी॰
॥३३॥

33

र्थः ॥४१॥ तथापि क्रोधस्यैका येनाशङ्क्याशयेनाह ॥ अतिपातितेति । हे भीम अक्षमा अक्षांतिः
क्रोधकर्तृ भवंतं चांडजनवत् पृथक्जनमिवाहीनजनमिव नयसिद्धेः नयसाध्यात् फलात् अप
नेतुं त्याजयितुं न अर्हतीति । न योग्या भवति । असमये क्रोधस्य आत्मसंतापातिरिक्तं फलं
नास्तीत्यर्थः । किंलक्षणा अक्षमा । अतिपातितकालसाधना । कालाः समयपाः साधनानि
सहायादीनि कालाश्च साधनानि च कालसाधनानि अतिपातितानि पराजितानि कालसा
धनानि यया सा अतिपातितकालसाधना । पुनः किंलक्षणा अक्षमा । स्वशरीरेंद्रियवर्ग
तापिनी । स्वशरीरं च इंद्रियवर्गश्च स्वशरीरेंद्रियवर्गौ स्वशरीरेंद्रियवर्गयोः तापिनी स्व
शरीरेंद्रियवर्गतापिनी दाहकर्त्रीत्यर्थः ॥४२॥ अक्षमायाः दोषमुक्त्वा क्षमायाः उप
कारणमाह उपकारक इति । पुनः किंभूता वेत्याह । हे भीम तितिक्षासमं क्षांतिसमानं अन्य
साधनं उपायः नास्ति । यद्यस्ति तर्हि तितिक्षैव साधनं नान्यदित्यर्थः । किंलक्षणं साधनं भृ
शं अत्यर्थं पुनः किंलक्षणं साधनं आयतेः उत्तरकालस्य उपकारकं । स्थिरफलहेतुरित्य ॥३॥
र्थः । पुनः किंलक्षणं साधनं । भूरिणः अनेकस्य कर्मफलस्य कार्यसिद्धेः प्रसवः आदिका

© Dharmartha Trust J&K. Digitized by eGangotri

रणं। प्रसूयते अनेनेति प्रसवः। अपरं किंलक्षणं साधनं। अनपायि। स्थायम् अविनश्यदेवेत्यर्थः। अ
पायो नाशो न भवत्यस्य अनपायि। पुनः किंलक्षणं साधनं। द्विषां शत्रूणां निबर्हणं विनाशकमित्य
र्थः। सातिः तितिक्षेत्यमरः। अलतिति क्षासममति अनुक्रोपमासमासः। अर्थालुप्तोपमा॥ ४॥
ननु तितिक्षायाः फलं केऽपात् दुर्योधनः सर्वान् नराज्ञः वशीकुर्यादित्यत्रोत्तमो रेह॥ प्रणतिरिति।
कृ भीमवृक्षयः यादवाः सदा सर्वकालं सुयोधनं दुर्योधनं न प्रणमंति। सुहृज्जा वेर्नमंतीत्यर्थः
किं तु कालमपेक्षंते इत्यर्थः सदेव इत्यस्यार्थः। यतः किंलक्षणाः वृष्णयः। मानभृतां अभिमानव
तां प्रथमे अग्रेसराः। प्रथम वरमेत्यादिना ऊ सङ्इविकल्पः। सुयोधनः स्वयं अभिमानी अभिमा
नान्यान्न सहते इत्यर्थः। किंलक्षणान् नः अस्मान् विहाय अप्यन्या। किंलक्षणान् नः। प्रणतिप्रवणा
न् प्रणामे प्रवणान् प्रणतौ प्रवणाः प्रणतिप्रवणाः तान् प्रणतिप्रवणान् नम्रानित्यर्थः। सु
योधनेन न तथेति भावः। पुनः किंलक्षणाः वृष्णयः। सहजप्रेमनिबद्धचेतसः। सहजः अकृत्रिम
स्नेहः प्रेम तं चतत्प्रेम च सहजप्रेम सहजप्रेम्णा निबद्धं संलग्नं चेतांसि अन्तःकरणं येषां ते सहज
प्रेमनिबद्धचेतसः। अस्मासु विषये गाढस्नेहाः लग्नचेता इत्यर्थः सुयोधने तु न तथेत्यर्थः। का
र्यवशात् एव तं नतं स्थितेत्यर्थः। अनुरागस्त्व स्मास्वेवेत्यर्थः। सतियावेदसमयेन किंचि ६

© Dharmartha Trust J&K. Digitized by eGangotri

34

दस्मात्कं असाध्यं भवेदिति भावः॥४४॥ किंच कारणांतरमाह॥ सुहृद इति॥ पुनः किमुवाचेत्याह। हे भी
म ते सर्वे दुर्योधनोपजीविनोपि नराः राजानः धृतराष्ट्रात्मजं दुर्योधनं यापयंति। स एवं ते इति कोर्थः।
कालं गमयंति गमयिष्यंतीत्यर्थः। तर्हि उत्सन्नेते विनयादिवायाद्दवानुकुल्यादिवा कालं ग
मिष्यंति। कार्यो कालेपि वक्षीपक्षप्रवेशिन एवेत्यर्थः। किमर्थं आत्मसिद्धये। आजीवना
र्थं। वृत्तिसिध्यर्थमित्यर्थः। तत्कृये एषां वृक्षीनां यादवानां सुहृदः मित्राणि च अपरं ये सहृ
जाः सहजाताः पितृमातृपक्षाः तथा इतरे कृत्रिमसुहृदः तथा च ये एतेषां वृक्षीनां मतं वृक्षि
पक्षं न विलंघयंति। नातिक्रमंति। ते द्वयेपि पुरुषाः दुर्योधनोपजीविनोपीति शेषः॥४५॥
किं तु नायमभियोगकालमीहा। इत्याशयेनाह॥ अभियोग इति॥ हे भीम अभियोगः अभिमा
नः इमान् पूर्वोक्तान् महीभुजान् राज्ञः प्रतिघाटयिता भेत्स्यतीत्यर्थः। किंलक्षणो अ
भियोगः। भवता च यातस्य सुयोधनस्य कृतः विहितः अवधस्त इति शेषः। किंलक्षणस्य
तस्य। कृतागसः कृतः अवधिः परिभाषितकालो यस्य सः कृतावधिः तस्य कृतो वधः सु
योधनस्य कृतमितीव बंधी। अवधिस्तु वधतेस्यासीम्नि कालेबलेपि वेति विश्वः। अभियो ॥३५२॥
गस्तु राधस्यात् इवपराभवाभिमान इत्यमरः। क इव हरिद्विप इवाय था हरिद्विपः सी

© Dharmartha Trust J&K. Digitized by eGangotri

सूर्यः समुत्पतन्नेव उद्यन्नेव उदयं प्रापन्नेव कमलाकरान् कमलसमूहान् उद्घाटयति प्रविकाशयति भे
ष्यतीत्यर्थः ॥४१॥ अथापनयने दृष्टिपक्षाः तं त्यजेषं नीत्याह ॥ उपजापेति । पुनः किमु वाच्येत्याह
हे भीमसः दुर्योधनः नृपतीन् अन्यानपि नृपानुपजापसहान् भेदयोग्यान् विक्षतान् भेत्स्यति
भेदं करिष्यतीत्यर्थः । सहन्त इति सहाः उपजापस्य भेदस्य सहाः उपजापसहाः तानुपजापसहान्
किं कुर्वन् तेषां नृपतीनां विलंघयन् मदात् अवमानयन् अवगणयन्नित्यर्थः । किंलक्षणः सन्
तः मदोद्धतः मदेन उद्धतः मदोद्धतः राज्यमदेनेत्यर्थः । उद्धतो दुरेतो विनीतो विग्रहः । भेदोपजापावि
त्यमरः । अवमानिनो जनाः सुभेद्या इति भावः । न वते सहिष्णव इत्याह ॥ हे भीम प्राकृतोपि जनः की
नापि लोकः च्यधः त्रियतां अपमानेन सहते नन्वमतिरात हि राजकं राजसमूहं किमु न न सहते इति
किमु वक्तव्यमित्यर्थः । किंलक्षणं राजकं । लोकाधिकधाम । लोकोत्तरप्रतापं । तथावसन्नि ।
नं सन्नमेव राजमंडलं तत्र स्थाने व अवलंबयिष्यते इति भावः । अत्र कौमुतिकन्यायेनार्थान्तर
न्यासो लंकारः ॥४२॥ अनुप्रयमे सर्ये सखीनि वेत्यादि वन्वेव रोक्ष रीत्यात स्पमदसंभावनाक
थमित्यत्राह ॥ असमापितेति । हे भीम अभिमानशालिनां अहंकारिणां पुरुषाणां निभृतयः एव
संपदः एवमदं अहंकारं विन्नविकारं उत्तं नयितुं वढ्यितुं प्रभवंति समर्थाः भवंति । संपदः ए

© Dharmartha Trust J&K. Digitized by eGangotri

कि॰टी
॥३५॥

35

ववर्द्धयंतीत्यर्थः। किंलक्षणं मदं। तावता स्वल्पेन कार्यकारणपर्यंतेनेंत विशेषः। विनयेन दत्तवे
गं प्रति बद्धवेगमित्यर्थः। न तु स्वरूपतो हतं। किंलक्षणानां अभिमानशालिनां। असमापितकृ
त्यसंपदां। असमापितासमाप्तिं नीता कार्यसंपत् कृत्यसंपद् यैस्ते असमापितकृत्यसंपदः
तेषां असमापितकृत्यसंपदां। अकृतकृत्यानामित्यर्थः। कार्यसमाप्तिपर्यंतं खलजनः तूष्णीं
न तिष्ठतीत्यर्थः। अत एव सर्वेषां संपदः पृथक् जनेषु जनं विकारयंतीति भावः॥४८॥ अपमद
स्य अनर्थं वंश्लोकद्वयेनाह। मदेति। अपराग इति। हे भीम असहिष्णुना असहनशीलेन विजिगी
षुणा पुरुषेण महानपि रिपुः उन्मूलयितुं मूलात् उद्धर्तुं सुकरः सुलभः सुसाध्यः सुकरो
न्मूलन इत्यर्थः। किं वत् तरुवत्। तरुरिव। अत्र वितुप्रत्ययो इवार्थी यथा केनचित् पुरुषेण महा
नपि तरुः उन्मूलयितुं पातयितुं सुलभः। किंलक्षणो रिपुः अपरागसमीरणेरितः। अपगतः
रागो अनुरागः प्रीतिर्यस्मात् असो अपरागः अपरागः समीरण इव। अपरागः समीरणेन ई
रितः नोदितः प्रजानां मनस्यं अनुराग इत्यर्थः। पुनः किंलक्षणो रिपुः क्रमशीर्णाकुलमूल ॥३
संहतिः। क्रमेण शनैः शनैः परिपाकात् बुद्धिविशेषेण शीर्णा निर्णीभूता वल्लो नरित प्रायाः आ
कुलानां मूलपुरुषाणाम् अमात्यादीनां संहतिः प्रकृत्यादिः स्वजनवर्गसमूहो यस्याऽसौ

© Dharmartha Trust J&K. Digitized by eGangotri

१० विरोधः वैरं नृपं अपदे तिनाशयतीत्यर्थः। किंल क्षणोति रुः १०

क्रमशीर्णाकुलमूलसंततिः। किंलक्षणो तरुः। अपरागसमीरणेरितः। अपरागसदृशो समीरणो
वायुः तेनइतितः। शिथिलीकृतः पुनः किंलक्षणोतरुः। क्रमशीर्णाकुलमूलसंततिः। क्रमेणशी
र्णाशिर्णीभूता शनैः जीर्णा चा तथा आकुलाः शिथिलाः मूलसंहतिः मूलसमूहो यस्य सः। किंवद्
नीममूढता अज्ञत्वं कार्याकार्यपरिज्ञानाभावः चं नृपं राज्ञानं नियमेन अवश्यं निवियुंक्ते। नष्टं
यति। न जहातीत्यर्थः। किंलक्षणं नृपं। मदमानसमुद्धतं। मदो दर्पः मानः अहंकारः मदश्च मानश्च
मदमानौ मदमानाभ्यां समुद्धतः मदमानसमुद्धतः। तं मदमानसमुद्धतं उत्कटमित्यर्थः। तया
मूढतया। किं स्यादित्याह। अतिमूढः नयात् नीतिमार्गात् उत्पतेत् उत्क्षिप्यते। मात्पतत इत्यर्थः। किंव
जनो लोकः नयहीनात् नीतिरहितात् राज्ञः सकाशात् अपरज्यते विरक्तो भवति त्यजतीत्यर्थः।
।।५८।। ननु अंतर्भेदमात्रेण कथं साध्यस्तत्राह। अणुरिति। हे भीम अणुरल्पीयानपि विग्रहः
अंतःप्रकृतिप्रकोपजः अंतप्रकृतयः अमात्यादयः। अंतःप्रकृतीनां प्रकोपः। अंतःप्रकृतिप्रकोपः।
अंतःप्रकृतिप्रकोपाज्जातः अंतप्रकृतिप्रकोपजः। प्रकृतिः पंचभूतेषु स्वभावे मूलकारणे
छंदः कारणगुह्येषु जनेमात्यादिष्विति वैजयंती। कइव। अनलइव। यथा अनलोऽग्निः। अखिलं
भूधरं गिरिं हिनस्ति ज्वलयति दहतीत्यर्थः। किंलक्षणः अनलः। तरुशाखांतनिघर्षजः।।त

© Dharmartha Trust J&K. Digitized by eGangotri

रूणां शाखाः तरुशाखाः तरुशाखानां अंताः तरुशाखांताः तरुशाखांतानि घर्षः संघर्षः तस्मा
ज्जाताः। अत्रोपमानोपमेयसमानधर्माणां बिंबप्रतिबिंबतया निर्देशाद्दृष्टांतालंकारः॥५१॥ तथापि
वर्द्धमानं शत्रुं कथं उपेक्षेत इत्याशंक्य दुर्विनीतमित्यादित्याह॥ मतिमानिति। हे भीम मतिमान् बुद्धिमा
न् प्राज्ञः पुमान् द्विषः शत्रोः समुन्नतिं वृद्धिं समुपेक्षते न। उपेक्षां कुर्यादित्यर्थः। किंलक्षणस्य द्वि
षः विनयप्रमाथिनः। विनयं प्रमथ्नातीति विनयप्रमाथी। तस्य। दुर्विनीतस्येत्यर्थः। उपेक्षायाः फल
माह। तादृक् अविनीतो रिपुः अंतरे रंध्रे सुजयः सुखेन जेतुं शक्यः हे भीम यस्मात्कारणात् अविनीतस्य सं
पदः अविनीतलक्ष्म्यः विपदंताः विपत् आपत् अंते अवसाने परिपाके यासां ताः विपदंताः। अविनी
तस्य दुर्विनेयस्य पुरुषस्येत्यर्थः। संपदः समृद्धयः॥५२॥ कथं दुर्विनीतस्य शत्रोः सुजयत्वमि
त्याशंक्य भेदजर्जरीत्यादित्याह। लघुवृत्ततयेति। पुनः किमु वावेत्याह। अनंतरः संनिहितः अ
निहितोऽस्य सोऽविजिगीषुः पुमान् नृपस्य राज्ञः मंडलं राष्ट्रं हरति स्वायत्तं करोति। किंभूत्वा
अभिभूय आक्रम्य आकलय्येत्यर्थः। किंलक्षणं तस्य नृपस्य मंडलं। लघुवृत्तितया अस्य स्वल्पवृत्ति
त्वात् मित्रादिजनपदेषु अंतर्मध्ये अमात्यादिषु बहिः भिदां गतं भेदं प्राप्तं। कः किमिव। आपगारयः शि
थिलकूलमिव। यथा आपगारयः नदीवेगः शिथिलं कूलं तटं हरति भजतीत्यर्थः। किंलक्षणं कूलं ल ॥३६॥
घुवृत्तितया उदकस्य वेगेन शीघ्रगत्या बहिरंतश्च भिदां गतं जर्जरीभूतमित्यर्थः। उपमालंकारः

© Dharmartha Trust J&K. Digitized by eGangotri

॥५३॥ अनुशासतमिति॥ पराशरात्मजो वेदव्यासः तं युधिष्ठिरं अभीयाय प्राप्तवान्। किंलक्षणं तं। आ
कुलं अनाविलं असंकीर्णं यथा भवति तथा अर्जुनाग्रजं भीमसेनं इति पूर्वोक्तरीत्या अनुशासतं उप
दिशंतं शिक्षयंतं। अर्जुनस्य अग्रजः भीमसेनः तं च हाहियोनुमभावः॥ किंलक्षणं अर्जुनाग्रजं।
नयवर्त्माकुलं। नीतिमार्गव्याकुलं व्यग्रं आरिनिकारक्षुब्धमित्यर्थः॥ किंलक्षणः पराशरात्मजः। उ
त्पन्नेन राज्ञा युधिष्ठिरेण अभिवांछितः आकांक्षितः स्वयं आगतो अर्थ इव। स्वयं प्राप्तः मनोरथ इव।
उत्प्रेक्षालंकारः॥५४॥ अथ श्लोकद्वयेन मुनिं विशिनष्टि मुनिं वर्णयति। मधुरैरिति। सहसोपगतेति।
जगतीभुजा राज्ञा युधिष्ठिरेण सः मुनिः वेदव्यासः सविस्मयं यथा भवति तथा उद्दृशे दृष्टः। सविस्मय
दृष्टिमाह। गामितं विशेषणमाह। किंलक्षणो मुनिः सहसा उपगतः अतर्कितमागतः। अकस्मादा
गत इत्यर्थः। किं कुर्वन्सन् परितः सामस्त्यभावेन निरीक्षितैः अवलोकनैः तिर्यग्विहगपश्वादीनि
व्याघ्रादीप्रभृतीनि शमं शांततां नयन् प्रापयन् सर्वेषां मृगव्याघ्रादीनां प्राणीनां निर्वैरत्वं कुर्वन्
तस्मिन्नागते व्याघ्रादयोपि शांताः बुभूवुरिति भावः। तथा संमतिमाह। स्वभाववैराण्यपि यांति
शांतिं विवेकीनो यत्र वसंति संतः। विवेकिनां चेतसि मत्सरस्यैवाविं विधयं तरणात मत्सरं। पुनः
किंलक्षणो मुनिः। तपसां सूतिः। प्रभवः प्रवर्त्तक इत्यर्थः। पुनः किंलक्षणो मुनिः। तथा तेन
वप्रकारेण सां पापानां आपदां असूतिः। अप्रभवः निवर्त्तक इत्यर्थः। पुनः किंलक्षणो मु

© Dharmartha Trust J&K. Digitized by eGangotri

ति:। धाम बिभ्रत स्वकायोत्तेजो दधत। किंलक्षणं धाम। पटु उज्वलं निर्मलं। पुन: किंलक्षणं धाम। एनसां पा
पानां दहनं निवर्त्तकं। दह्यते अनेनेति दहनं। पुन: किंलक्षणं धाम। विलोकनक्षमं दर्शनीयं। वज्रा
दिविलक्षणमिति भाव:। किंलक्षणै: निराह्नितै: मधुरै: मनोहरै: किंलक्षणैर्नितियैर्वि। अवशानि।
विघ्नतेव शः आयत्तत्वं वशता येषां तानि अवशानि प्रतिकूलानीत्यर्थ:। अवशा आयत्ततायां वेति
विश्व:। पुन: किंलक्षणो मुनि: उपेक्षते वपुष्मान मूर्तिमान् तः पुण्यसंचय इव। उपागत: पुण्यराशि
रिवा। उत्प्रेक्षालंकार:॥५६॥ अथोच्चकैरिति। अथानन्तरं मुनिदर्शनानन्तरं स: युधिष्ठिर: र
राज शुशुभे। किं कुर्वन् सन् आसनत: उद्यन् सिंहासनात् उत्तिष्ठन् किंलक्षणात् आसनत:
उच्चकै: उन्नतात् पुन: किंलक्षणात् आसनत: परार्ध्यात् श्रेष्ठात् अत एव किंलक्षण: स: विधू
तारुणवल्कलाग्र: विधूतानि अरुणानि वल्कलाग्राणि यस्य स: विधूतारुणवल्कलाग्र:। क इव यथा घर्म
रश्मिरिवा यथा घर्मरश्मि: सूर्य: राजते तद्वदित्यर्थ:। किं कुर्वन् सन् सुमेरो: शृंगात् उद्यन् सन् उ
त्तिष्ठन् सन्। किंलक्षणो घर्मरश्मि: कीर्णाकपिशांशुजाल:। कीर्णं प्रसृतं आकपिशं अंशुजालं
किरणसमूहो यस्य स: कीर्णाकपिशांशुजाल:। उपमा॥५७॥ अवहितमति: नरेंद्रो युधिष्ठिर:
ऋषिवत आसनं अलंचकार। अशोभयत। किंकृत्वा ऋषिप्रवरं मुनिश्रेष्ठं अर्हां पूजां विधाय ॥३८॥
न चापस्यात् ... शास्त्रीयां शास्त्रोक्तामित्यर्थ:। पुन:। किंभूतां ऋषिवत
न चापस्यात् किंलक्षणां पूजां गुरूपदिष्टां शास्त्रीयां शास्त्रोक्ता

© Dharmartha Trust J&K. Digitized by eGangotri

६ स्थितस्य। किंलक्षणं गुरुं इद्धदीप्तं अंशुजालं अजितस्य वैजयं वितन्वंतं विस्तारयंतं।

तपषिमहैत्नीतिऋषियोग्यां किंलक्षणं सः अवहितहृदयः। अप्रमत्तचित्तः। किंलक्षणं आसनं। तदनुम
तां तेन ऋषिणा व्यासेन अनुमतां। अनुज्ञातं दत्तमित्यर्थः। कः किमिव। प्रशमः श्रुतमिवायथा
प्रशमः शांतिः श्रुतं शास्त्रं अवर्णं अलंकरोति। मुनिआज्ञयोपविष्टो नित्यर्थः॥ ५७॥ व्यक्तोदितेति
सः नरेंद्रो युधिष्ठिरः मृगांकमूर्तेः वंशमसः लक्ष्मीशोभां उवाह। वहतिस्म। मृगांकः मूर्तौ यस्य सः
तस्य। किंलक्षणस्य मृगांकमूर्तेः। सकलस्य। संपूर्णस्य। षोडशकलात्मकस्य। पुनः किंलक्षणस्य
मृगांकमूर्तेः। गुरुं बृहस्पतिं अभिमुखं सन्मुखं तिष्ठतः वर्तमानस्य। किंलक्षणो नरेंद्रः। मुनेः स्थि
व्यासस्य अभिमुखम् सन्मुखं तिष्ठन् वर्तमानः। किंलक्षणस्य मुनेः विकीर्णधाम्नः। विकीर्णं विस्ता
रितं धाम तेजो येन असौ विकीर्णधामा तस्य। किंलक्षणस्य मृगांकमूर्तेः विकीर्णधाम्नः। किंलक्ष
णः नरेंद्रः व्यक्तोदितस्मितमयूखविभावितोष्ठः। व्यक्तोदितैः स्फुटोद्भूतैः स्मितमयूखैः हास्यकिरणैः विभा
वितोशोभावितोऽष्ठो यस्य सः। व्यक्तं यथास्यात्तथा उदितं यत्स्मितं मंदहासस्तस्य मयूखैः किरणैः
विभासितः ओष्ठो यस्य सः। अभितः परितः इत्यादिना द्वितीया॥ अभितोऽभिमुखं तिष्ठत इति शेषः॥
॥५८॥ ॥श्रीः॥ ॥इति श्रीनृसिंहविरचितायां अन्वदीपिकायां किरातार्जुनीयटीकायां द्वितीय
स्सर्गः समाप्तः॥ ॥श्रीः॥ ॥❀॥ ॥ततइति त्रिभिः श्लोकैः मुनिं विशिनष्टि। वर्णयतीत्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

कि॰ टी॰
॥३८॥

38

ततस्तदनंतरं उपवेशानंतरं धर्मात्मजो युधिष्ठिरः मुनिं वेदव्यासं प्रति वक्ष्यमाणं वाक्यं आबभा
षे उवाचेत्यर्थः। इति वक्ष्यश्लोकेनान्वयः। किंलक्षणः धर्मात्मजः तदभ्यागमने हेतुं कारणं परी
प्सुः जिज्ञासुः। यत्र वेदव्यासस्य यत् आगमनं तस्मिन् आगमने आगमनविषये कारणं ज्ञातुमि
च्छुरित्यर्थः। किंलक्षणं मुनिं। सुखोपविष्टं। सुखेन स्थितमित्यर्थः। पुनः किंलक्षणं मुनिं उल्लसन्तं
अंशुजालैः स्वकीयकिरणसमूहैः प्रांशुं उन्नतं संतमिव स्थितमिव। किंलक्षणैः अंशुजालैः
शरच्चंद्रकराभिरामैः आह्लादकारकैः। शरदि चंद्रः शरच्चंद्रः शरच्चंद्रस्य कराः किरणाः शरच्चंद्रकराः
शरच्चंद्रकरा एव अभिरामाः तैः अभिरामैः मनोहरैः। पुनः किंलक्षणैः अंशुभिः उत्सर्पिभिः। उत्
ऊर्ध्वं सर्पति ते उत्सर्पंतः तैः उत्सर्पिभिः। ऊर्ध्वप्रसारिभिः। पुनः किंलक्षणं मुनिं। आनीलरुचं।
आनीला नष्टा रुक् कांतिर्यस्य सः आनीलरुक् तं। नष्टवर्णमित्यर्थः। पुनः किंलक्षणं जटाः
बिभ्राणं दधानं। किंलक्षणाः जटाः पिशंगीः पिंगलवर्णाः। पुनः किंभूतं मुनिं उत्प्रेक्षते अंबु
वाहमिव। जलदमिव स्थितं। किंलक्षणं अंबुवाहं। तडित्वंतं। विद्युत्सहितं समानमर्थो द्वेका
॥१॥ प्रसादेति। पुनः किंलक्षणं मुनिं। समग्रां संपूर्णां प्रसादलक्ष्मीं दधतं धारयंतं। प्रसादः सौम्य ॥३८॥
ता। प्रसादस्य लक्ष्मीः प्रसादलक्ष्मीः तां प्रसादलक्ष्मीं संपदं दधानं। पुनः किंलक्षणं मुनिं।

© Dharmartha Trust J&K. Digitized by eGangotri

वपुःप्रकर्षेण आकारसंपदा आकृतिसौंदर्येण असंस्तुतानामपि अपरिचितानामपि जनानां मनःसु चेतस्सु आर्द्र
भावं स्नेहभावं चित्तानि प्रायं प्रसह्य बलात् समासज्जंतं कुर्वंतमित्यर्थः। लगयंतं किं वक्तव्यं प्रसन्नाकारेण स
र्वः स्निह्यतीति भावः। किंलक्षणेन वपुःप्रकर्षेण जनातिगेन जनं अतिगच्छतीति जनातिगः जनातिगः तेन
जनातिगेन लोकातिशयात्॥२॥ अनुद्धतेति। पुनः किंलक्षणं मुनिं। अनुद्धताकारतया शांताकारतया लिंगेन
अंतःकरणस्य चेतसः वृत्तिं तत्वं तं द्योतयंतं। अनुद्धतः सौम्यः आकारः आकृतिर्यस्यासौ अनुद्धताकारः अ
नुद्धताकारस्य भावः अनुद्धताकारता तया। आकार एव तस्य चित्तस्य शुद्धिं कथयति। पुनः किंलक्षणं मु
निं। इंगितेनैव दर्शितेनैव कृतोपसंभाषं तत्ता उपसंभाषा भाषणं येन सः कृतोपसंभाषः तं। उत्प्रेक्षते दृष्टि
विशेषेणैव उपसंभाषणमिव स्थितः। किंलक्षणेन इंगितेन। माधुर्यविस्रंभविशेषभाजा। माधुर्यस्य भावः सौ
म्यत्वं विस्रंभो विश्वासः माधुर्यं च विस्रंभश्च माधुर्यविस्रंभौ तयोः विशेषः अतिशयः तं भजतीति माधुर्यवि
स्रंभविशेषभाक्। तेन माधुर्यविस्रंभविशेषभाजा। किंलक्षणां व्रतिपूतां शांतामित्यर्थः। विविक्तौ पूतवि
जनावित्यमरः। स्नेहविश्वासौ॥३॥ अथ सोमज इति। पुनः किंलक्षणं मुनिं। श्रुतीनां वेदानां प्रसूतिं प्रभवां
आदिकारणं। किंलक्षणानां श्रुतीनां। एनः प्रणुदां पापच्छिदां क्षिप्रं। पुनः किंलक्षणानां श्रुतीनां। धर्मनि
बंधिनीनां। धर्मं निबध्नंतीति धर्मनिबंधिन्यः ताः। धर्मनिबंधिनीनां अग्निहोत्रादिधर्मप्रतिपादकानां। श्रुतिस्त्री
वेद आम्नाय इत्यमरः। परिप्सुः जिज्ञासुः आप्नोतेः सन्नंतादुप्रत्ययः॥४॥ अनागस इति। किमु वा वेत्या

© Dharmartha Trust J&K. Digitized by eGangotri

कु॰ टी॰
॥३५॥

39

ह। हे मुने एभ्यः नवदर्शनसंपत् संपन्निलाभः दिवः गगनस्य अंतरिक्षस्य वृष्टिस्तुल्या पर्जन्यसमा तया अभवत्।
भवतः दर्शनं। भवद्दर्शनं। भवद्दर्शनस्य संपत् भवद्दर्शनसंपत् किंलक्षणया दिवः वीतबलाकोदयाः।
वीताः निर्गताः बलाहकाः मेघाः यस्याः सा वीतबलाहका तस्याः। वीतबलाहकायाः। वाहिं वहंती बलाह
काः मेघाः मेघवर्षणवत् तर्कितोपपन्नं युष्मद्दर्शनं सर्वथा कस्यचित् श्रेयस्कारणमित्यर्थः। अस्माक
मिति शेषः। किंलक्षणा भवद्दर्शनसंपत्। अनाप्तपुण्योपचयैः पुरुषैः दुरापा दुःप्रापा। अनाप्तः अप्राप्तः पुण्यो
पचयो धर्मसंग्रहो यैस्ते अनाप्तपुण्योपचयाः तैः। अनाप्तपुण्योपचयैः। असंततपुण्यसंग्रहैः पुरुषैः दुर्लभेत्य
र्थः संततपुण्यैरेव पुरुषैः प्राप्यते इत्यर्थः। अपरा किंलक्षणा भवद्दर्शनसंपत्। फलस्य भाविनः फलस्य स
वित्री प्रियस्कारी। अपरा किंलक्षणा भवद्दर्शनसंपत्। निर्धूतरजाः निर्धूतः रजः रजोगुणो यया सा निर्धूतर
जाः। अन्या फलसवित्री सरजा भवति। फलं पुष्पनिदानं। तत्र रजः रजो रजोगुणो धूलोपरागे पीति विश्वः।
॥५॥ अघक्रिया इति। पुनः किं मुवाचेत्याह। हे मुने अघकृतूनां ज्ञोगानां क्रियाः अनुष्ठानानि कामदु
घाः जाताः। नः अस्माकमिति शेषः। कामान् अभिलाषान् दुहंतीति कामदुघाः फलप्रदा इत्यर्थः। हे मु
ने अघ इदानीं भूमिदेवाः ब्राह्मणाः सत्याशिषः जाताः। सत्या तथ्या आशीः आशिर्वादो येषां ते सत्याशिषः। ॥६॥
जन्मान्र ब्राह्मणोक्ता आशिषो अघ फलिता इत्यर्थः। द्विजात्यग्रजन्मभूमिदेववाडवाः विप्रश्च ब्राह्मणो इत्यमरः। यस्मात्कारणा
त् अस्मीति अहं आसंसृतेः संसारं जगत्सु लोकेषु बहुमानपात्रं जातः। बहुमानस्य मान्यतायाः आश्र

© Dharmartha Trust J&K. Digitized by eGangotri

स्वं-आश्रयत्वं प्राप्तः। संहृतेः-आइति आसंहृतिः तस्याः-आसंहृतेः संसारात् इति आसंसारं यावत् संसारमित्यर्थः
कस्मिन् सति मुनौ। त्वयि-आगते सति। सांप्रतम् इति शेषः। अस्मि-अस्मिंश्च मध्यमपुरुषार्थे निपात्यते। आङ् मर्यादाभि
धौ-एव सकलत्सत्कर्मभूतं च त्वदागमनं येन मे जगन्मान्यते इति भावः॥६॥ श्रियमिति हे मुने लोकगुरोः तव अ
मोघं सफलं संदर्शनं किं किं न धत्ते। किं किं न करोति। अपितु सर्वं करोतीत्यर्थः। तत् किं किं तदाह। श्रियं लक्ष्मीं
विकर्षति। आकृष्य ददातीत्यर्थः। अघानि पातकानि दुःखानि अपहन्ति। दूरीकरोति। नाशयतीत्यर्थः। अंहि
दुःखव्यसनेष्वित्यमरः। तथा श्रेयः पुरुषार्थं परिस्नौति स्नवति। कीर्तिं यशस्तनोति। विस्तारयति। किं
बहुना सर्वं संपादयतीत्यर्थः। कस्येव आत्मयोनेरिव। यथा आत्मयोनेः ब्रह्मणः संदर्शनं सर्वसंपदः साध
कं भवतीत्यर्थः॥७॥ स्योतदिति। पुनः किमुवाचेत्याह। हे मुने हे भगवन् मे वचः दृष्टिः च संनिधेस्तव सं
निर्वृत्तिं सुखं एति प्राप्नोति। किंलक्षणं वचः। हिमद्युताविव मसि ननिर्वृत्तिं अनवाप्तसुखान अवाप्तं सु
खं येन तत् अनवाप्तसुखं। किंलक्षणात् हिमद्युतो स्योतन्मयूषपि सुधास्त्राविकरेपि। स्योतंतः सुधाः स्र
विणः मयूषाः किरणाः यस्य असौ स्योतन्मयूषः तस्मिन् स्योतन्मयूषे हे स्वामिन् तथा मे चेतः अंतःकरणं
च संनिधेस्तव समीपे उत्कूसति वा उल्लासं प्राप्नोति वा प्रलपति वेत्युत्प्रेक्षा। किंलक्षणं चेतः समुज्झितज्ञाति
वियोगखेदं समुज्झितास्त्यक्ता ज्ञातयस्तेषां विज्ञातयः। तेषां वियोगः तेन खेदः। वियोगखेदो वा येन
तत् त्यक्तबंधुज्ञातिविरहदुःखितं खिन्नमित्यर्थः। सगोत्रबांधवज्ञातीयबंधुस्वजनाः समा इत्यमरः

© Dharmartha Trust J&K. Digitized by eGangotri

50

॥८॥ निराश्रयमिति। हे मुने प्रश्नकुतूहलिन्त्वं निरास्पदं आश्रयरहितं निराश्रयमित्यर्थः। आगमप्रयोज
न प्रश्नो निरास्पद इत्यर्थः। प्रश्ने कुतूहलमस्यास्तीति प्रश्नकुतूहली प्रश्नकुतूहलिनं भावः प्रश्नकुतूह
लित्वं। निरास्पदे हेतुमाह। यस्मात्कारणात् निस्पृहाणां निर्गतास्पृहा येभ्यः ते तेषां मुनीनां अस्मासु अस्म
आयत्तं५ त्सदृशेषु जनेषु अधीनं दिनचर्यं किमु न किमपीत्यर्थः। न किंचिदस्मात् न्यन्यपीत्यर्थः। आधारश्च विवक्षा
यां सप्तमी। यद्यप्येवं तथापि इमां मां मुखरीकरोति वाचालं करोति। प्रेरयतीत्यर्थः। किं कर्तुं ते तव गिरं
वाणीं श्रोतुं आकर्णयितुं। किं लक्षणां गिरं। कल्याणकरीं। अस्मद्धितैकहेतुं कल्याणं श्रेयः करोतीति
कल्याणकरी तां। निस्पृहस्यापि तव नाकाम अस्मद्धितकारित्वात् श्रोतव्यमित्यर्थः। मुखकुंडेभ्यः इत्यन्त
॥९॥ इत्युक्तेति। द्वैपायनेन व्यासेन नरेंद्रो युधिष्ठिरः इति वक्ष्यमाणां गिरं वाचं अभिदधे। उक्तः किं ल
क्षणां गिरं। उदारां अर्थवतीं। द्विगता आपो यस्मात् तत् द्वीपं द्वीपं अयनं स्थानं जन्मभूमिर्यस्य सो द्वीपा
यनः द्वीपायन एव द्वैपायनः स्वार्थे अण् वक्तव्यः किंत्वचाज्ञयापपन्नोत्तरयसिद्धो मनः समाधाय त्रय
सिद्धिं अपेक्षेत्यर्थः। राज्ञः इति शेषः। किं लक्षणो नरेंद्रः अमुना प्रकारेण उक्तिविशेषरम्यं वाक् मनो ॥ः
हरं यथा भवति तथा उक्तवान् उवाचेत्यर्थः। उक्तेर्विशेषो वैविध्यं पुनः किं लक्षणो नरेंद्रः उदारचे ॥९
ताः महामनाः ॥१०॥ आदौ तावत्स्वस्य माध्यस्थ्यं दोषं श्लोकद्वयेन परिहरति। विचोषतामिति। हे नृ
प यस्मात्कारणात् जन्मवतां पुरुषाणां बंधुषु ज्ञातिषु तुल्यरूपा एकप्रकारा वृत्तिर्व्यवहारः अ

इति कोर्थः दाभ्यां पयाभ्यां गनयित्वार्थः। अभिपूर्वाद्दधातेर्बुवर्थे कर्त्रादिकमेकवचं

© Dharmartha Trust J&K. Digitized by eGangotri

भ्यर्हिता। उचिताया योग्येत्यर्थः। तर्हि मादृशां तपोधनानां तु विशेषणेन नियमेन अभ्यर्हिता योग्या। किंलक्षणे
नां भवतां अलज्जी महतिं भूतिं श्रेयः उभयत्र इह। इह लोके अमुत्र परलोके विवीषतां वेत्तुं संग्रहीतुं इच्छ
तां। विनोतेः सन्नंतात् शत्रुप्रत्ययः। किंलक्षणां भूतिं। यशोवतंसां। यश एव अवतंसो भूषणं यस्याः ता
तां। कीर्तिभूषणां। तथापि त्वल्पसत्त्वो विरतेपि हे नृप अतः कारणात् मे हृदयं मम मनः चेतो निघ्नं त्वदायत्तं
त्वदधीनं वर्त्तते। अतः इति कुतः। यतः यस्मात् कारणात् तावकीनैः त्वदीयैः गुणौघैः गुणसमूहैः मे हृ
दयं विजित्य प्रसह्य हृतं। स्वीकृतं आवर्जितं। अधीनो निघ्नं आयत्तं इत्यमरः। ननु निस्पृहस्य कोयं पक्षपा
त इत्यत आह। वीतस्पृहाणामपि। वीतरागाणामपि विरक्तानामपि भव्येषु साधुषु पक्षपाताः स्नेहाः भवंति
किंलक्षणानां वीतनिस्पृहाणां मुनिभाजां मुमुक्षूणां। ननु सा अनुग्रहे महतां साधुस्वभावक इति भावः
॥१२॥ सुतान पूयमिति। उपालंभे कारणमाह। यः सः धृतराष्ट्रः। नः युष्माकं वधान्निकारणमेव त्यक्तवा
न् यदि सुताः गुणाधिकाः स्वकपमद्राक्षीत्तत्राह॥ विषयाभिलाषः भोगतृष्णा बलात् हठात् मोहं अविवेकं
विधत्ते करोति। विषयाभिलाषातिरिक्तः कश्चित्त्यागे हेतुर्नास्तीत्यर्थः। अथ नृपस्य गुरुरेव तां शंकां शयितुं
धृतराष्ट्रस्य दुश्चेष्टां उद्घाटयति। यूयं वैर्यं भवंतः तस्य राज्ञो धृतराष्ट्रस्य सुताः पुत्राः किमु न भवं
ति भवंत्येव वस्तुत एवेत्यर्थः। वा अथवा गुणौघैः शौर्यादिभिः सुयोधनेन अतीताः नातिक्रांताः अपितु अ
तिक्रांताः अतिक्रांता एवेत्यर्थः। कर्तरि क्तः। अत्र कारणकार्यसमर्थनरूपोर्थांतरन्यासः॥१३॥ अथ
राज्ञः युधिष्ठिरस्य उत्साहवर्द्धनाय शत्रुहानिं दर्शयति। जहातु। इति। हे नृप अर्थसिद्धिः कार्यसिद्धिः फल

© Dharmartha Trust J&K. Digitized by eGangotri

कि॰टी॰
॥५१॥

निष्पत्तिः एनं धृतराष्ट्रं कथं न कृतवान्। कथं न त्यक्तवान्। अपि तु त्यक्तव्य एवायं धृतराष्ट्रः संसर्ग्य संदिग्धसंदेशं भ्रा
त्र्यकर्णादि पुत्रि ष्टतो। कर्णेनेंद्रो दुर्मंत्रिणः संदिग्ध्वान्न निर्णीतञ्चेन अवलंबते इत्यर्थः। हि युक्तो अयमर्थः।
हि यस्मात्कारणात् असाधुयोगाः दुर्जनसंसर्गाः जयांतरायाः जयविघातकाः विपदां कष्टानां पदानि स्थाना
नि भवंति। न केवलं अर्थघातिनः किंतु अनर्थकारिणश्चेति। किंलक्षणानां विपदां। प्रमाथिनीनां दुःखो
त्पादनशीलानां। प्रशमभाजां लयं शालिनां सां अर्थसंपदः धृतराष्ट्रविदुर्जनविधेयत्वादिनश्यतीति भावः
॥१५॥ पथ्यश्रुतायामित्यादि। एवं शत्रोनर्थं सूचयित्वारात्रो अर्थसिद्धिं सूचयति। हे नरपते यया परं उत्कृष्टगु
णेषु शांत्यादिविषयेषु प्रमस्तेन अविज्ञातं प्रकटितं दुःसहमपि सोढवेता। त्वया साधु अनुष्ठितमित्यर्थः
किं कुर्वता त्वया अरिपूर्णोशत्रूणां समितो सभायां विरायविरं धूर्तं भारं दधानेन धारयता। किंलक्षणं धु
रं। धर्म्यां। धर्मात् अनपेताधर्म्यां तां। किंलक्षणायां समितो पथ्यः मार्गो न्याय्यः तायां त्वया यां दुरात्मनो दुःश
सनस्य द्रोपदीसंग्रहणे साक्षात्समं गीतं तस्याव त्यामित्यर्थः। सभा समितिः संसदित्यमरः। किंलक्षणं प्रमवि
पत्स्वपि आपत्स्वपि अविपत्तिः न विद्यते विपत्तिर्नाशो यस्य तत् अविपत्ति। अविनाशीत्यर्थः। पुनः किंल
क्षणं प्रेमा अतएव रम्यं मनोहरं। अत्र विभावनालंकारः। असत्यामपि सामग्र्यां कार्योत्पत्तिर्भावना।
विधाय इति। हे नरपते तव विद्विषः शत्रवः कृतोपकाराइव उपकृता इव तं तद्वत् अंतेज्ञायंते कृतः उ ॥
पकाराये स्तेकृतोपकाराः यतः अपकारेष्वपुपकारं एव संवृत्तः। यत्सो अन्यमसोजन्ये नाङ्गतिसुख
कर्मासीदित्यर्थः। किं ल चाक्षु तेन कपटेन भवतः तव विध्वंसं अपकारं विधायकर्तृत्वा। कथं भूतस्य

41

© Dharmartha Trust J&K. Digitized by eGangotri

भवतः शमैकवृत्तेः शम एव एका मुख्या वृत्तिर्वर्तनं यस्य सः शमैकवृत्तिः तस्य शमैकवृत्तेः अपरोपतापिन इत्य
र्थः। किंलक्षणं विध्वंसो। अनात्मनीनं आत्मनि हितं न भवतीति अनात्मनीनः तं अनात्मनीनं स्वस्यैव असदृ
शमित्यर्थः। किंलक्षणाः विद्विषः प्रकाशितत्वन्मतिशीलसाराः मतिश्च शीलं च सारश्च त्वन्मतिशीलसाराः
प्रकाशिताः त्वन्मतिशीलसाराः यैः ते प्रकाशितत्वन्मतिशीलसाराः प्रकाशितैः त्वन्मतिशीलयोः त
व प्रज्ञासद्वृत्तयोः सारः प्रकर्षो यैस्ते इति वा प्रकाशितो तव मतेः शीलसारो स्वभावस्थिरता यैस्ते इति वा म
तिबुद्धिप्रकर्षशीलमाचरणप्रकर्षसारो दृढांश प्रकर्षप्रकाशवंत इत्यर्थः॥१६॥ अथ कार्यं शत्रुणाल
भ्यति। हे नृपत वचित्क्रमेण पराक्रमेण धरित्रीव वसुधा लभ्या प्राप्या वसु द्रव्यं धत्तीति वसुधा। तवेति
तत्यानो कर्तरि षष्ठी तव त्वया लभ्या इत्याह। विपक्षोपि शत्रुरपि ज्यायान् प्रशस्यतरः कैः नयवीर्यास्त्र
बलैः नयश्च वीर्यं च अस्त्राणि च बलानि वीर्यास्त्रबलानि तैः। वीर्यं शौर्यं। अस्त्राणि आग्नेयादीनि बलानि से
न्यानि येषां॥ अतः कारणात् उपायः विधिर्विधेयः कर्तव्यः किमर्थं प्रकर्षाय आधिक्याय उत्कर्षायेत्यर्थः।
हि यस्मात् कारणात् रतो संग्रामे जयश्रीः विजयलक्ष्मीः प्रकर्षतंत्रा उत्कर्षप्रधाना। प्रकर्षसाध्येत्यर्थः॥
तंत्रं प्रधाने सिद्धांते इत्यमरः। बलिन एव जयः न दुर्बलस्येति भावः॥१७॥ अथ यस्तौ कवच्छेय
न विपक्षस्य इयान् यस्त्वं वर्तयति। त्रिसप्तेति। सः जामदग्न्यः परशुरामः यस्य भीष्मस्य वीर्यावधूतः सन्
पराक्रमाभिभूतः सन् अंबिकादिस्त्रियेरे इत्यर्थः। तत्पराजयसमये गुणानां शौर्यादीनां प्रकर्षे
अतिशये। आधरवशं आश्रयाविवेदज्ञः। स्वविद्यायाः स्वशिष्यभीष्मादेव स्वस्मादपि प्रकर्षोऽस्म

© Dharmartha Trust J&K. Digitized by eGangotri

कि॰टी॰
॥४२॥

नदर्शनादिति भावः। किं लक्षणः जामदग्न्यः यस्य भीष्मस्य गुरुः। शास्त्रोपदेष्टा अस्त्रविद्योपदेष्टा प्रसिद्धः।
यतः किं लक्षणः जामदग्न्यः त्रिःसप्तकृत्वः जगतीपतीनां हन्ता। हिंसकः त्रिसप्तवारान् इति त्रिसप्तकृ-
त्वः एकविंशतिवारानित्यर्थः। जमदग्नेः अपत्यं पुमान् जामदग्न्यः स्मेति अव्ययं पादपूर्णे इति विश्वः॥१७॥
यस्मिन्निति। हे नृप सः भीष्मः रामस्यं अमेकस्य योद्धुमात्रस्यापि कुर्यादेवेत्यर्थः। किं कुर्वन् धनुः धुन्वन् आ-
स्फालयन् सन् सः कः यस्मिन्नीप्सेद् इति कोर्थः भीष्मे विषये अंतकोपि यमोपि पराभवं तिरस्कारं प्राप्नुइ-
व आसीत् किं लक्षणः अंतकः। अनैश्वर्यजनितव्यलीकः ईश्वरस्य भावः अनैश्वर्यं असामर्थ्यं तेन जनितं व्य-
लीकं दुःखं येन असौ जनितवैलक्ष्यः। दुःखवैलक्ष्ययोर्व्यलीकमिति यादवः॥१८॥ सज्जं तमिति हे नृ-
प वः युष्माकं मध्ये कः गुरुं द्रोणं वार्यं सत्वा सोढुं शक्नुयात् न कोपीत्यर्थः। किं लक्षणं गुरुं। आजौ संग्रामे
इषुसंहतिं शरसमूहं तन्वंतं सृजंतं पुनः किं लक्षणं गुरुं। कोपज्वलितं कोपेन दीप्तं। पुनः किं लक्षणं
गुरुं। उत्पश्यंते अंतवह्निमिव स्थितं। कल्पांतानलमिव वर्तमानं। किं लक्षणं वह्निं। परिस्फुरल्लोल
शिखाग्रजिह्वं परितः समंतात् परिस्फुरंत्यः सर्वत्र प्रसरंत्यः लोलाः चपलाः शिखाग्राण्येव जिह्वा
रसना यस्य सः परिस्फुरल्लोलशिखाग्रजिह्वः तं परि। पुनः किं लक्षणं वह्निं। अतएव जगज्जिघत्सं तं।
जगद्भुक्तुं लोकं अत्तुमिच्छंतं अदेः सनंतात् शतृप्रत्ययः। अत्तुमिच्छतीति जिघत्सति जिघत्सन् तं उ- ॥४२॥
त्तालंकारः॥२०॥ निरीक्ष्येति। हे युधिष्ठिर मृत्योरपि अंतकस्यापि यमस्यापि प्रसभं प्रत्यर्थिनि यु-
धि भीतिषु पक्षपातः पक्षिवयोनुभवः जायते उत्पद्यते। मृत्युरपि यमोपि अस्याकारणात् बिभीयादि-

© Dharmartha Trust J&K. Digitized by eGangotri

त्यर्थः। किमुतान्य इति भावः। किंलक्षणेषु भयेषु कदाचिदपि असंस्तुतेषु अपरिचितेषु अननुभूतेष्वि
त्यर्थः। किंल चाराधेयं कर्णं निरीक्ष्य दृष्ट्वा राधया कुंत्याः अपत्यं पुमान् राधेयः तं राधेयं। किंलक्षणं राधे
यं संरंभनिरस्तधैर्यं। संरंभेन कोपेन निरस्तं निराकृतं परेषां शत्रूणां धैर्यं निर्विकारचित्तत्वं येन असौ
संरंभनिरस्तधैर्यः तं। परधैर्यापहारिणमित्यर्थः। पुनः किंलक्षणं राधेयं। आराधितजामदग्न्यं। आ
राधितः शुश्रूषितः जामदग्न्यो भार्गवो परशुरामो येन स सो आराधितजामदग्न्यः। तं। जामदग्न्याधिष्ठि
तशस्त्रशास्त्ररहस्यमित्यर्थः। अत्र भयसंबंधरहितत्वमत्योः भयसंबंधाभिधानात् असंबंधेसं
बंधरूपातिशयोक्तिरलंकारः। ३१।। अथानंतरं करालीयं मुनिरागमनं वस्त्रोक्तद्वयेनाह।।
ययासमासादितेति। मद्रचयोगेति। हे नृप हे प्रदानो विनतहे दानपात्रभूतफलमाकृष्टा अहं तो
विद्यां दत्तं आगतास्मि। किंभूतं मरुच्चयोगाय प्रकृष्टेला भायु। किंलक्षणां विद्यां देवतानां दु
हीनां आराधिनीं आराधयति तन्ये ताः आराधिनीनां आराधिनी सपादयित्री इत्यर्थः। पुनः किंलक्षणां
विद्यां भूरिधाम्नीं। महाप्रभावां। ऐंद्रमंत्ररूपां। किंलक्षणानां देवतानां। महामहिम्नां। महान् महि
मा यासां ताः तासां महानुभावानां प्रदानेतु वितं भू विश्वमयस्यां सा तां एकपदेवा। कमिवा सिद्धिमि
वा साक्षात्कार्यसिद्धिमिवेति विधायाः अमोघशक्तिचोक्तिः। अत एव हे प्रदानो विनतहे दानपात्र
भूतफलमात्र च सपात्रचोक्तिः।। तां कायया विद्ययात्वया कपिकेतकेन अर्जुनेन एते पूर्वोक्ताः भी
ष्मादयः योद्धारः उन्मूलयितारः निर्मूलाः करिष्यंते। उन्मूलयंतीत्यर्थः। कपिः हनुमान् केतवंवि

© Dharmartha Trust J&K. Digitized by eGangotri

कि॰टी॰
॥५२॥

63

ण्यस्य सः तेन पुनः किंलक्षणेन कपिकेतनेन तपसां तपस्यायां वरतां कुर्वता । किंलक्षणां तपस्यां दुष्करां
अति दुष्करां । पुनः किंलक्षणेन कपिकेतनेन समासादितसाधनेन समासादितं प्राप्तं पाशुपतास्त्ररू
पं साधनं येन सः तेन किंलक्षणां चानुजस्य युधिष्ठिरस्य वीर्यं पराक्रमं दुरापं दुर्बलं समवाप्य ज्ञात्वा अन्य
था उन्मूलयितुम् अशक्या इति भावः ॥२३॥ इत्यूचिवांसमिति । जिष्णुः जयनशीलो ऽर्जुनः विनयेन अनौ
द्धत्येन तं मुनिं व्यासं उपससाद प्राप । किं कुर्वन् हे अर्जुन त्वं व्रज गच्छ अध्ययन अनुष्ठानं कुरु इत्ये
वंरूपं अजातशत्रोः धर्मराजस्य वाक्यं प्रमाणयन् प्रमाणीकुर्वन् किंलक्षणं मुनिं इति पूर्वोक्तप्र
कारेण उक्तवंतं भाषमाणं पुनः किंलक्षणं मुनिं । प्रसीदन्तं प्रसन्नं । कइव अन्तेवसन्निवा
चात्र इव । यथा अन्तेवासी शिष्यः विनयेन स्तुत्या नवा गुरुं उपासीद इति । तदुदितं यर्थः । अन्तेवासि
नो शिष्याविन्त्यमरः ॥२४॥ निर्याययेति । अथानन्तरं विद्यापार्थो ऽनन्तमनिपदं प्राप्तवती । किंलक्षणा
२८ मूर्तेः व्यासस्य मुखवान्तवदनात् निर्याय निर्गत्य निसृत्य । किंलक्षणा विद्या । वह्निकणावदाता अग्नि
स्फुलिङ्गा इव । अवदाता उज्ज्वला देवता सान्निध्यादिति भावः । विद्या उद्रूपमन्त्ररूपा । का मिव ।
दीप्तिः प्रभा पद्मम् इव यथा दीप्तिः प्रभा पद्मकोमलं प्रविशति । किंलक्षणा चारुकेसरस्य रवेः बिबान्त
मंडलात् निर्गत्य निसृत्य । किंलक्षणात् बिंबात् दिनादिरम्यात् दिनादौ प्रभाते रम्यं दिनादि ॥५
रम्यं तस्मात् किंलक्षणा दीप्तिः वह्निकणावदाता उज्ज्वला । किंलक्षणं पद्मं स्फुरत् विकस
त्वा उपमालंकारः ॥२५॥ योगं च तमिति । सः मुनिः व्यासः विधिवत् वेदोक्तप्रकारेण सद्यः तत्क्षणं

© Dharmartha Trust J&K. Digitized by eGangotri

तत्कालमेव तं योगं अविहननसाधनोपायं तस्मै अर्जुनाय विततार इदो॥ कस्मात् तपःप्रभावात् तपस

प्रभावः तपःप्रभावः तस्मात्। तं कं येन योगेन स्थितेषु प्रवृत्तिमद्दादिषु अवभासे सति साक्षा

त्कारे सति अस्य अर्जुनस्य चक्षुः विरायविरकालाय समुन्मिमीलित्व उन्मिषितमिव उद्घाटि

तमिव। इत्युत्प्रेक्षा। किंलक्षणाय तस्मै योग्यतमाय अखिलाज्ञाननाशनः तथाभासः विराद्धस्य

दृष्टिलाभ इवास्य जातः इति भावः। उत्प्रेक्षालंकारः॥२९॥ आकारेति॥ मुनिः व्यासः इति वक्ष्यमा

णं वाक्यं उवाच। किं करिष्यन् तं अर्जुनं तपःसमाधौ तपोनियमेन नियोजयिष्यन् नियोजयितु

मिच्छन् किंलक्षणे तपःसमाधौ। विजयोदये विजयस्य फलके। किंलक्षणं तं आशंसितभूरि

लाभं। आशंसितः आख्यातः कथितः भूरिलाभो अनेकाश्रयप्राप्तिर्येन असौ आशंसितभूरि

लाभः। तं। महानगस्त्रव कमित्यर्थः। पुनः किंलक्षणं तं आकारं मूर्त्तिं दधानं। किंलक्षणं आका

रं। अंतःकरणानुरूपं। अंतःकरणे शब्दनतद्वृत्तिरुत्साहात्म्यस्य तादनुरूपं तदनुकूलमि

त्यर्थः। उत्साहानुगुणव्यापारक्षममित्यर्थः। समाधिर्नियमेध्याने इति विश्वः॥३०॥ अनेनेति॥

क्षिमुयावेत्याह। हे अर्जुन त्वं जपोपवासाभिषवैः स्वाध्यायानाशनस्नानैः अवामुनानीततपस्वि

नां आचारं अनुष्ठानं आचर। सम्यक् अनुतिष्ठ। अनुष्ठानं कुरु॥ जपश्च उपवासश्च अभिषव

श्च ते जपोपवासाभिषवाः तैः जपोपवासाभिषवैः जपः स्वाध्यायामंत्रावृत्तिर्वा। उपवासो अन

शनं अभिषवः स्नानं तैः किंलक्षणस्त्वं अनेन योगेन विवृद्धतेजाः विवृद्धं सम्यग्वृद्धं तेजो बलं दे

© Dharmartha Trust J&K. Digitized by eGangotri

स्य सः विवृद्धेज्ञाः अनेनेति स्वोपदिष्टेनेत्यर्थः। पुनः किं लक्षणस्य। उपात्तशस्त्रः। उपात्तं गृहीतं शस्त्र
मायुधं येन सः उपात्तशस्त्रः। गृहीतायुधः किं कुर्वन् निजां स्वां पदवीं वरमेपरस्य प्रवेशं मार्गं अयच्छ
न्। असमर्पयन् नानदद्दत्॥ ५७॥ कपिध्वजस्य इति। क्षेत्रविशेषेण तपःसिद्धिरित्याशयेन तां निदर्शयन्नाह। पुनः
किमुवाच व्याहार इत्यर्जुनं एषः गुह्यकाधिपः। क्षणेन क्षणमात्रेण अनायासेन तं शिलोच्चयं चाने
ष्यति। प्रापयिष्यति। एष इति अनन्तरमेवास्य पुरः प्रादुर्भावान्निर्देशः। गुह्यं अन्तः करणं निप्राये
कायति कथयति। प्रतिगुह्यकः धातूनामनेकार्थत्वादित्यर्थः। तं कं यत्र यस्मिन् शिलोच्चये वत्स्यन् त्वं त
पांसि करिष्यसि। चरिष्यसि। किमर्थं गोत्रभिदः इन्द्रस्य प्रसत्तये प्रसादाय प्रसत्तिः प्रसादः रूप्यते
किं लक्षणानि तपांसि सुदुष्कराणि अतिकठिनानि। किं लक्षणं शिलोच्चयं चारुशिलोच्चयं॥
चारवः रम्याणि शिलोच्चयाः शिखराणि यस्य सः चारुशिलोच्चयः तं। इन्द्रनीलगिरिमित्यर्थः। अद्रि
गोत्रगिरिग्रावाचलशैलशिलोच्चया इत्यमरः॥ ५८॥ इति ब्रुवति तेन महर्षिणा व्यासेन ति
रोवये बभूवे अन्तर्धानं प्रापे। भावे प्रयोगः। शम किं लक्षणेन तेन इति पूर्वोक्तं महेन्द्रसूनुं अ
र्जुनं ब्रुवाणेन उक्तवता। वर्तमानसामीप्ये वर्तमानवद्वेति भूतप्रत्ययः। तिधानस्य अविलंबन
स्रवनार्थः। राजराजानुचरः सेवकोयक्षः पूर्वोक्तः अस्य मुनेः व्यासस्य तं प्रदेशं स्थानं अर्जुना
धिष्ठितं प्रदेशो अधितस्थौ। प्राप्तः। राजराजस्य कुबेरस्य अनुचरः राजराजानुचरः कइवा आदे
शइवा आदेशइव छन्नेः स्थाने प्राप्तइत्यर्थः। राज्ञा प्रमोऽरापं इंद्रयन्ते क्षत्रियराजयोः। उपमालंका ।।५

© Dharmartha Trust J&K. Digitized by eGangotri

रः ॥३१॥ तताननतिरिति। सः पुष्पदन्तनामा यक्षः तस्मिन्नर्जुने संप्रसादं विस्रंभं विश्वासं ददाय। प्राप। किं
लक्षणः पुष्पदन्तः। स्वस्त्यवबिज्ञातनिस्पृहः। उत्पन्नाभिलाषः कस्मिन्निव सख्याविव। यथा मित्रे सुहृ
दि लोकः विश्वसिति। पुनः किंलक्षणः पुष्पदन्ते अश्वरः नतानतिः नतानतिर्नमस्कारो येन नम्रसौह
तानतिः) किंलक्षणे तस्मिन् व्याहृतसांत्ववादे। व्याहृतः उक्तः सांत्ववादः प्रियवचनं येन। अथ सो व्या
हृतसांत्ववादः तस्मिन् ॥ हि युक्तोयमर्थः सतां साधूनां योगसंगतिः आशु शीघ्रं विश्वासयति। वि
श्वासं कारयति। किंलक्षणे नैजिह्मे अजयनशीले ॥३२॥ अथेति। तमो मोहः शोकः पांडुसुतान् युधि
युधिष्ठिरादीन् चतुरो भ्रातॄन् शनैः शनैः मंदं मंदं प्रपेदे प्राप। तेषां विवेकिचात् भीतभीतमिवेतुकै
स्मा। किंलक्षणान् पांडुसुतान् तेनार्जुनेन दयायशसे विहीयमानान् त्यज्यमानान्। पुनः किंल
क्षणान् पांडुसुतान् बृहत्फलीनाम्नेनेकबुद्धिप्रकारान्। किं कानि वा तमः अंधकारः सुमेरुकुंजानि
नाय यथा तमोंधकारः सुमेरुकुंजान् प्राप्नोति। किंलक्षणान् सुमेरुकुंजान् उष्णभासा सूर्येण उदया
य विहीयमानान् त्यज्यमानान् पुनः किंलक्षणान् सुमेरुकुंजान् बृहत्फलीन् सोवर्णचादीप्यमा
नान्। तमसः संकोचे कारणोक्तेः सुमेरुअहणं कुंजानां सोवर्णद्योतनार्थं
किंलक्षणं तमः दुःखलता भला नोदुःखेनलतः आत्मलाभः स्वोत्पत्तिर्येस्मात् ततेषां विवेकिचात्

© Dharmartha Trust J&K. Digitized by eGangotri

कथंचित्लब्धोदयमित्यर्थः॥३४॥ असंशयेति। कर्तृभिः सः दुःखातिभारोऽपि दुःखातिभारभूतमपि
लघुः अल्पः मेने ज्ञातः दुःखमेव अतिभारः दुःखातिभारः अतिशयदुःखमित्यर्थः। अथ एको भारः अनेक
ष्वबहुभिर्विभज्य उह्यमानो लघुर्मन्यते तद्वदित्यर्थः। तन्मनोभिः तेषां युधिष्ठिरादीनां बहूनांमिनोति
ष्टं तत्पुवरतोरित्यर्थः॥ किंलक्षणः दुःखातिभारः। असंशयालोचितकार्यैर्नुन्नः। असंशयं असंदिग्धं
45 यथा स्यात्तथा आलोचितं विवेचितं यत्कार्यं तैर्नुन्नः कार्यं गुरु एवं विविच्य विचार्य निरस्तः त्यक्त इत्य
र्थः। अपरं किंलक्षणः दुःखातिभारः। पुनः प्रेम्णा हेतुना स्नेहेन भ्रातृणां वा सत्येन कर्त्रा समानीय वि
भज्यमान इत्यर्थः समशो भागीक्रियमाणः तुल्यस्नेहानां तुल्यदुःखमपि भवतीति भावः। कस्मा
दिव उत्सवक्षणे तुल्याद्विभागादिव। पूर्वोक्तानन्दप्रमत्तानां समभागादेवेत्यर्थः। वस्तुपरिमाणादेवेत्य
र्थः पुनर्विभागग्रहणं तस्य हेतुत्वोत्प्रेक्षा उपमालंकारः॥३५॥ अथैवं प्रेमणा आत्तष्यमाणमपि शोकं
विवेको निर्जिगायेत्याह॥ धैर्येणेति सः शोकः दुःखं तेषु वृत्तेषु पार्थेषु पदं स्थानं न अवाप॥ नकरोती
त्यर्थः। तत्र हेतुनाह। तेषां पार्थानां धैर्येण निर्विकारचित्तत्वेन। तथा च महर्षेः व्यासस्य प्रवर्त्तकस्याति
विशेषः विश्वासस्य तया धैर्येण वचनं च तस्य द्वैपायनवचनेत्यर्थः। तथा च तीव्रात् दुःसहात् अरातिप्र
नवात् अरातिहेतुकात् मन्योः क्रोधाद्धेतोः तथा अर्जुनस्य प्रभावपरिज्ञानाद्वेति। हेत्वंतरं विशे
षणद्वारेणाह। किंलक्षणेषु पार्थेषु मघोनः सुते अर्जुने वीर्यपराक्रमविद्यस्तु॥ ज्ञानवस्तु॥३६॥

वेने३

© Dharmartha Trust J&K. Digitized by eGangotri

नानीति। अशर्म पूर्वोक्तं असुखं एकौघभूतं सततं सा द्रौपदी। अभिपेदे प्राप। किं कृत्वा चतुरः पार्थान् तान्
दूरं यथा भवति तथा विहाय। निरस्य। किंलक्षणान् तान् भूरिधाम्नः। तेजस्विनः। किं कामिवाधूतं
अंधकारं विभावरी रात्रिमिव। यथाधूतं अंधकारं भूरिधाम्नः वासरस्य दिवसस्य चतुरः यामान्
प्रहरान् दूरं यथा भवति तथा विहाय। निरस्य। एकौघभूतं सततं तत्क्षणात् तत्क्षणपद्मगतां विभावरी प्रा
प्नोति तद्वदित्यर्थः। शर्म सुखानि चेत्यमरः॥ अशर्मेति नञ्समासः॥२५॥ सा द्रौपदी विलोकने अ
र्जुनदर्शने लोचने मीलयितुं निमेषं कर्तुं न सेहे न शशाक। किंलक्षणा सा। अगूढभावापि। अगू
ढाभिप्रायापि। स्फुराभिलाषीत्यर्थः। पुनः किंलक्षणा सा। मंगलभंगभीरुः। मंगलहानेर्भीता। किं
भूते लोचने। पर्यश्रुणी। परिगतानि अश्रूणि बाष्पाः ययोस्ते पर्यश्रुणी। अश्रूणां दृक्षपावरक
चपितन्निपातस्य मंगलत्वात्तस्मिन्निवर्तकं निमीलनं सानवकारेत्यर्थः॥ अत एव पुनः किंल
क्षणे लोचने। तुषारलेशाकुलितोत्पलाभे। तुषारस्य हिमस्य लेशाः बिंदवः तैः आकुलिते
व्याप्ते च ते उत्पले कमले च। तुषारलेशाकुलितोत्पले। तुषारलेशाकुलितोत्पलयोः आभा
इव आभा ययोस्ते। तुषारलेशाकुलितोत्पलाभे॥ भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजंतु
षु इत्यमरः। इत्युपमालंकारः॥२६॥ अकृत्रिमेति। इंद्रसूनुः अर्जुनः मनःप्रसादांजलिना तिका
मं अत्यर्थं हृष्टं दर्शनं जग्राह। गृहीतवान्। प्रसादः प्रसन्नो मनन इत्यमरः॥ मनःप्रसाद इव अंज

© Dharmartha Trust J&K. Digitized by eGangotri

46

लिः मनःप्रसादांजलिः तेन मनःप्रसादांजलिना। किंलक्षणं दृष्टं रामार्पितं। दत्तं द्रौपदीतयार्
र्पितं। किमिव। पाथेयमिव। यथा ग्रामग्रामी कश्चित्पुमान् पथिमार्गे साधु पाथेयं शंबलं करोत्
वा गृह्णातीति तद्वदित्यर्थः। किंलक्षणं दृष्टं। अकृत्रिमप्रेमरसानुविद्धं। अभिरामं क्रियया निर्वृत्तः
कृत्रिमः नकृत्रिमः अकृत्रिमः प्रेमैव रसः प्रेमरसः अकृत्रिमश्चासौ प्रेमरसश्च अकृत्रिमप्रेमरसः
अकृत्रिमप्रेमरसेन अनुविद्धं। अकृत्रिमप्रेमरसानुविद्धं मनोज्ञं। पुनः किंलक्षणं दृष्टं। दृष्टिवि
लोभि। दृष्टिप्रियमित्यर्थः। दृष्टिं विलोभयतीति तत् दृष्टिविलोभि। पथाय पक्षेपि स्यात् माविकाम
धुरादिरसगर्भं रामार्पितं कांतासमर्पितं दृष्टिप्रियं वा तदप्यंजलिना गृह्यते॥३४॥ धैर्यावसा
देति॥ राजपुत्री द्रौपदी तं भ्रातरं महता कष्टेन इति वक्ष्यमाणां वाचं उवाच। निरुद्धबाष्पोदये
न सन्नः दीनः क्षीणः [illegible] हृदयसन्नकंठं यथा स्यात्तथा। निरुद्धश्चासौ बाष्पोदयश्च निरुद्धबाष्पो
दयः अश्रूद्गमः निरुद्धबाष्पोदयकंठः कंठस्वरो यस्मिन् तत्तत्। किंलक्षणा राजपुत्री। धैर्यावसादेन
धैर्यनाशेन हृत कृतप्रसादा हृतनिर्मलत्वा क्षोभं गमिता इत्यर्थः। केन का इव। वन्यद्विपेन वन
गजेन निदाघसिंधुरिव। ग्रीष्मनदी वा यथा वनगजेन ग्रीष्मसिंधुः हृतप्रसादा क्रियते। उप
मालंकारः॥३५॥ किं तु वा वेत्यादि॥ मनस्विनामिति। आतपसां प्रवृत्तः प्रसिद्धः तपसां सम्यक् प्र ॥
सिद्धिपर्यंतम् असमाप्तिना इति कोर्थो असमाप्तिं विना हे शांत अत्यर्थं उन्मना मा भूः उत्सुको मा भूः

© Dharmartha Trust J&K. Digitized by eGangotri

असमद्भिरहेच्चया दुःखेन कर्त्तुमित्यर्थः उद्विग्नस्य तपःपरिपंथित्वादिति भावः॥ अनुन्मनाः उ
न्मनाः संपद्यंत इति उन्मनीमाभूः किंकुर्वन् संभावनीयोग्यतां गौरवं उद्धरिष्यन् उद्धारं करिष्य
न् उद्धारकत्वामिति शेषः॥ किंलक्षणां संभावनां द्विषन्मनिशल्यपरेमग्नां दुरुद्धरामित्यर्थः किंल
क्षणे द्विषन्मनिपंकभूते। पंकसदृशे। कर्दमोपमिते। कामिवाभूतिमिव। संपदमिव। यथा कश्चि
त्सुमान् भूतिं संपदं शत्रुपंके निमग्नां उद्धरति किंलक्षणानां तपसां आधिद्विषां। आधीनां मानसी
पीडनानां दुःखानां द्विषां छिदां। दुःखहारिणामित्यर्थः॥ विभूतिमिवेत्युपमालंकारः॥ विशेषणे
सधर्म्याता भूतत्वमादेषि शावौयोग्येसत्योपमानयोरिति विग्रहः। भूतिर्भस्मनि संपदीत्यम
रः॥३९॥ यश इति। अथ अनोत्सुकादाशाद्यो र्थसिद्धिकारणमित्याह। पुनः किंभुवावेत्या
ह। हे अर्जुन लक्ष्मीश्रीः संपत् सिद्धिर्वा पुरुषाणां त्वां के समीपं समुपैति वश्या भवता के
वा समुत्सुका कांता इव। यथा समुत्सुका सोत्कंठिता कांता स्त्री एवंभूतानां मानिनां उत्संग
एति। तद्वदित्यर्थः॥ किंलक्षणानां पुरुषाणां। अनियोगभाजां। अनिनिवेशरतां। उद्यमवता
मित्यर्थः। किं कर्त्तुं यशोधिगंतुं। कीर्त्तिं लब्धुं। वा अथवा सुखमीहितं। सुखलिप्सया सु
खं लब्धुमिच्छया। वा अथवा मनुष्यसंख्यामतिवर्त्तितुं वा मनुष्येषु गणनीं अतिक्रामि
तुं अमानुषं कर्म कर्त्तुं अत एव किंलक्षणानां पुरुषाणां निरुत्सुकानां। निर्गतः उत्स

© Dharmartha Trust J&K. Digitized by eGangotri

॥किरी॥
॥५७॥

57

कथमविशेषायेभ्यः ते निरुत्सुकाः तेषां निरुत्सुकानां अदुर्मनायमानानामित्यर्थः॥ सिद्धिर्नो
मपूर्वोक्तियशोदुःखाभावसिद्धिः तस्मादस्माद्विरहदुःखं आतपसिद्धेः सोढव्यमिति भा
वः॥५०॥ लोकमिति॥ अथार्जुनस्य कोपोद्दीपनद्वारेण तपः प्रवृत्तिं निश्चलीकर्तुं अरिपरा
भवं तावत्ववच्छर्मिश्लोकैः उद्घाटयति॥ लोकमिति॥ व्रीडानतैरिति॥ वीर्योवदानेषि
ति प्रसह्येति॥ पुनः किमु वाचेत्याह॥ हे अर्जुन सः निकारः अपकारः परिभवः चद्विनाचया
विना मे हृदयं न वीकरिष्यति॥ दुःखसहितं करिष्यति॥ किं लक्षणं हृदयं॥ उपसुप्तं सुप्तं
नवत्वा किं लक्षणः अरिनिकारः॥ कुतश्चित् चद्विरहदुःखा पुनः आद्यः भविष्यन्नवीभ
विष्यन्नान चघापिमुष्कमिति भावः॥ कमिव॥ व्रणमिवाय थाव्रणः पुराणप्रहारः कदाचित्
नवीभवति तद्वदित्यर्थः॥ तथा आर्द्रः॥ दुःखितस्य पुनर्दुःखोपचयः अशोषायमपि दुः
खहेतुं पुनः उद्घारयतीत्यर्थः॥ सः कः यः निकारः परैः शत्रुभिः अस्मासु प्रसह्य बला
त्प्रयुक्तः॥ आचरितः कृत इत्यर्थः॥ केशांबराकर्षणरूपः॥ निकारः स्मर्तुमपि वक्तुं वनश
क्यः तर्हि अधिकर्तुं अनुभवितुं किमु तायस्य स्मरणमपि दुःसहं॥ तस्यानुभवस्तु सुत
रां दुःसहः॥५१॥ लोकमिति॥ किं कुर्वन्नित्यत्र स्वक्षत्रियस्यजातेः उत्तमं बलं दीप्तिं वापि ॥५९
वंवसुधनं मुष्णन्॥ अपहरन्॥ त्यजन्नित्यर्थः॥ किं लक्षणं उज्जः॥ जैत्रं जयनशी[illegible]॥ किंल

© Dharmartha Trust J&K. Digitized by eGangotri

त्नत्नस्य छत्रस्य। विधात्रा ब्रह्मणा लोकं जनं गोप्तुं रक्षितुं विहितस्य निर्मितस्य। पुनः किं कुर्वन्
मनस्वितायाः अभिमाने अहंकारं निघ्नन्। खंडयन्। तेजः विद्यते येषां ते तेजस्विनः। तेजस्वि
नां भावः तेजस्विता। तस्याः। किंलक्षणायाः तेजस्वितायाः विजयैकवृत्तेः। विजय एव एका
मुख्या वृत्तिर्वर्त्तनं यस्याः सा विजयैकवृत्तिः तस्याः। किंलक्षणे अभिमानं। प्राणेभ्योपि प्रि
यं इष्टं। वृत्तिर्वर्त्तनं जीवनमित्यमरः॥ अत्रोवल्लेद शब्दो भावे इति विश्वः॥ तेजस्विनां मानहा
निः प्राणहानिरित्यर्थः॥ उपमालंकारः॥४२॥ व्रीडानतैरिति। पुनः किंलक्षणः परिभवः
निकारः आप्तजनोपनीतः। पूज्यजनेन उपनीतः प्रापितः अपरं किंलक्षणः अरिनिकारः।
संशय्य संशयं विस्मयं प्राप्य देशांतरस्थैः नृपैः प्रपन्नाः संभावितः आप्तवचनात्कथं
छिद्यास्यः। किंलक्षणैः नृपैः व्रीडानतैः व्रीडया लज्जया आनतैः अधोमुखैः। कुत्सित
रत्नांतस्य वर्णनादिति भावः। इत्येषां पूर्वं बांचिरं ततनानां व्याख्या दंतनास्ति। अन्यथाव
ख्यापयते। किंलक्षणो निकारः आप्तजनोपनीतः। आप्तजनाः ज्ञातिजनाः तैः उपनीतः समा
नीतः तत एव संशय्य कथमिदमन्याप्युपेक्षणीयमिति विचार्य व्रीडानतैः नृपैः उप
सितैः स्त्रियः द्रौपद्याः केशाकर्षणादिदुःसहकर्मदर्शनात् कृच्छ्रेण प्रपन्नो नांगीकृतः ततः गोत्र
कलहेषु मध्यस्थैः उपहसितव्यमिति। बुध्या उपेक्षितव्यमिति भावः। पुनः किं कुर्वन्

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकि॰टी॰
॥५८॥

५४

य॰
ण्येऽदातेयशाः समूहन्तिवसं कोऽनुन्ति वा शत्रुपरिभूतस्य कुतः कीर्तिरिति भावः। किंलक्ष
णं यशः। प्रथितं प्रसिद्धं। अपरं किंलक्षणं यशः। पृथिव्याः भूमेः वितानभूतं उल्लोचजातं।
भूतशब्दः समपर्यायः। पुनः किंलक्षणं यशः। दिग्विकीर्णं। दिक्षु प्रसरितं। वितानमपि दिगंतल
ग्नं भवति। वितानमित्युपमा। अस्त्री वितानमुल्लोच इत्यमरः॥५४॥ वीर्येति। पुनः किंलक्ष
णः अरिनिकारः। वीर्यावदातेषु अकृतकर्मसु उत्तानविमर्शः। तास्कंदनः। वीर्याण्येव अव
दानानि अकृतकर्माणि वीर्यावदानानि तेषु पुरातनपराक्रमात् अकृतान्यपि कर्माणि प्र
रुन्धन्तीत्यर्थः। किं कुर्वन् संप्रतीतिं ख्यातिं अभूतामिव। अविद्यमानामिवान्वन्न कुर्वन्नि
त्यर्थः। पुनः किं कुर्वन् आयतीनां उत्तरकालानां प्रयामसत्ययं दैर्घ्यनाशं कुर्वन्। प्रयामस्य
दैर्घ्यस्य नाशः तं। कस्य कः कामिव। अर्कः अवशेषइव। अर्कत्विषामिवायथा अर्कः दिवस
स्य अवशेषः दिनांतः अस्तभागः अर्कत्विषो दिनकरकांतिं अभूतामिव अविद्यमानामिव क
रोति। अवदानं कर्मवृत्तमित्यमरः॥५५॥ वन्तुभिः कलापकं। प्रकारांतरेण मन्युं दीपयति।
व्रीडाकरत्वेन प्राप्नोतीति व्रीडेति। दुःशासनेनेति तत्र वक्ष्यमाणैः ज्ञात्यभिज्ञानहेतुभिः धनंज
यं विशिनष्टि। उपलंभयति। किमुवाचेत्याह। हे अर्जुन। असः त्वं धनंजयः। किंलक्षणं भूत ॥५६॥
स्त्वं। विकारं वैरूप्यं प्राप्तः। पूर्वाकारादन्यथाकारं गतः इत्यर्थः। कस्मात् अभिमानव्य
सनात्। अभिमानध्वंशात्। अभिमानस्य व्यसनं ध्वंश इत्यर्थः। अतो न्यदित्यभि

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञायते। किंलक्षणात् अभिमानव्यसनात्। असह्याद् दुःसहात्। क इव दंतीव यथा दंती हस्ती
दंतव्यसनात् भग्नदंतत्वात् विकारं वैरूप्यं प्राप्तस्सन् असौ दंतीऽतनवेति प्रत्यभिज्ञागो
चरो न भवति तद्वदित्यर्थः। पुनः किंलक्षणात् द्विषत्प्रतापांतरितोरुतेजाः द्विषतां प्रतापः द्विष
त्प्रतापः। द्विषत्प्रतापेन अंतरितं तिरस्कृतं उरु महत् तेजः प्रतापो यस्यासौ द्विषत्प्रतापांत
रितोरुतेजाः। पुनः कथंभूतस्त्वं। अह्नः दिवसस्य आदिरिव स्थितः प्रत्यूषकाल इव स्थितः।
किंलक्षणः अह्नः आदिः। शारदघनाकीर्णः। शारन्मेघाछन्नः आछादितः तद्वदेव प्रत्यभिज्ञाय
मानस्त्वं इत्यर्थः। मध्याह्नस्तु मेघाछिन्नोपि कथं विलक्षि~~त्यक्षि~~त्यभिज्ञायत इत्याशयेनो
क्तं अह्न आदिरिति॥ ४५॥ सव्रीडेति। पुनः किंलक्षणस्त्वं अस्त्रैः आयुधैः त्वचा अत्यर्थं न अव
समानः। न शोभमानः। किंलक्षणैः अस्त्रैः उपेक्षितैः सव्रीडमंदैरिव आपद्युपतैरिव स्थि
तैः। सव्रीडानि अत एव मंदानि तैः सव्रीडमंदैः। कस्मात् निःक्रियत्वात् निर्गता क्रिया ये
भ्यां तानि निःक्रियाणि तेषां भावः तस्मात्। अर्थक्रियाशून्यत्वात् अचेतनेषु अस्त्रेषु व्री
डादिवसचेतनधर्मः उपवर्ण्यते। पुनः कथंभूतस्त्वं उत्प्रेक्षते अन्यं आकारं आपन्नः स्व
रूपांतरं प्राप्त इव। कस्मात् यशःक्षयात् यशोभ्रंशात् किमिव क्षीणजलार्णवो म इव
रः। यथा क्षीणजलार्णवो मः पानीयं अन्यमाकारं प्राप्नोति। क्षीणं जलं यस्य सः क्षीण

© Dharmartha Trust J&K. Digitized by eGangotri

जलैः। क्षीणजलस्यासो अर्णवश्च क्षीणजलार्णवः। क्षीणजलार्णवस्य अम्भः क्षीणजला-
र्णवाम्भः पानीयं॥५५॥ दुःशासने। पुनः किंलक्षणैस्त्वं विदितिकामप्रवेदनेच्छया रतः ए-
भिः परिदृश्यमानैः असंयमितैः केशैः शिरोरुहैः कदर्थीकृतवीर्यसारः। कुत्सितो अ-
र्थः कदर्थः। कदर्थीकृतो गृह्यापकृतो वीर्यसारो यशोबलं यस्य सः। कदर्थीकृतवीर्य-
सारः पूर्वस्मात् धनंजयाद्भिन्नलक्षणः त्वं सः पूर्व एव धनंजयोसि। स एव त्वं वेत्तद्धिने-
वमस्मानुपेक्षसे इति भावः॥ किंलक्षणैः केशैः। दुःशासनामर्षरजोविकीर्णैः दुःशासन-
स्य अमर्षः कोपः दुःशासनामर्षः दुःशासनामर्ष एव रजः धूलिः दुःशासनामर्षरजः। दुः-
शासनामर्षरजसा विकीर्णाः। दुःशासनामर्षरजसो विकीर्णाः। तैः दुःशासनामर्षरजसा-
विकीर्णैः विनिक्षिप्तैः। पुनः किंलक्षणैः केशैः उत्थेहितै। अन्यथैरिवस्थितैः। अन्यथाक-
थमियं दशेति भावः। पुनः किंलक्षणैः केशैः भाग्यनाथैः भाग्यं दैवमात्रं नाथं शरणं
येषां ते भाग्यनाथाः तैः। दैवशरणैरित्यर्थः। अन्यथा स्वरूपमपि नश्येदिति भावः॥
॥५६॥ त्रिभिः कुलकं। अथाप्युपलक्षणे दोषमाह। सत्क्षत्रियेति। सः। क्षत्रियः। क्षतात् त्रायत
इति सत्त्वं क्षत्रियं कुलं तत्कार्मुकं कर्मणा प्रभवति इति कार्मुकं। हे अर्जुन। स एव क्षत्रियः ॥५७॥
क्षत्रियशब्दवाच्यः। यः सतो साधूनां त्राणे सहः रक्षणे समर्थः सहते इति सहः त्राणे स-

© Dharmartha Trust J&K. Digitized by eGangotri

सहः त्राणसहः। तदेव कार्मुकं। कार्मुकशब्दवाच्यं। तत् किं यस्य कार्मुकस्य कर्म सुरणं क्रियासु शक्तिः
वर्तते हे अर्जुन पुमान् पुरुषः द्वयीमप्यु किं क्षत्रियकार्मुकौ शब्दौ। असत्कारहतामिव। असत्कारेणा
नंगीकारेण हतां न शं अनुत्पत्तिं दूषितामिव करोति। किं कुर्वन् क्षत्रियशब्दः कार्मुकशब्दश्च अ
र्थजाते स्वार्थसिद्धये सामान्ये जातिमात्रेव हन्न वर्त्तयन्। किं लक्षणे अर्थजाते अफले तस्मात् त्वमपि
अस्मात् क्षेत्रेणोक्तदोषादात्मानं मोचयस्वेति वाक्यार्थः॥५८॥ वीतौजसेति। अथ वक्तुणां अपि ते
जीवेयुरित्याह। हे पार्थ त्वदीयाः गुणाः शौर्यादयः नः अस्माकं सरूपतां सादृश्यं भजन्तां। किं लक्षणे
ऽत्वे क्षत्रे सामान्यदुःखाद्वा समदुःखभाजि नद्वा। पुनः किं लक्षणाः गुणाः वीतौजसः वीतं गतं उजो येषां
ते वीतौजसः निःप्रभाः पुनः किं लक्षणाः गुणाः भूतिं अभ्युदयं अवेक्षमाणाः अपेक्षमाणाः। किं लक्षणां भूति
म् अवकृतां। अवताकरिष्यमाणा इत्यर्थः। पुनः किं लक्षणाः गुणाः संनिधिमात्रशेषाः। सत्तामात्रावशिष्ट
किं लक्षणानां नः। अवकृतमभ्युदयं अवेक्षमाणानां। आकाङ्क्षमाणानां पुनः कथंभूतानां नः वीतौज
सः अत्र विपरिणामः कर्त्तव्यः। अत एव समानदुःखत्वेसाधर्म्यं जनेत इत्यर्थः॥५९॥ तथापि समैवको
यं भार इत्यत आह। आक्षिप्येति। हे पार्थ इयं धूः शत्रूहननलक्षणो ऽपि ज्ञाप्रतिपालनलक्षणा योऽस्तया
निर्वाहकतयाचीर्णा आरूढा आरूढवती। आक्षिप्ता। इयं धूः कार्यं त्वयैव निर्वोढुं ते च दधानामिति मा
वः। किं लक्षणां धां रिपुभिः शत्रुभिः आक्षिप्यमाणा। तिरस्क्रियमाणा। कस्मात् समादात् अनवधा

© Dharmartha Trust J&K. Digitized by eGangotri

नतः प्रख्यातान्याः। नतु दोषवत्त्वादिति भावः। पुनः किं लक्षणं चांउल्ये दृते मृगेंद्रमिव स्थितं विद्यमानं।
किं लक्षणं मृगेंद्रं नागैः गजश्रेष्ठैः आलूनसटं आच्छिन्नकेसरं। छिन्नग्रीवाकमित्यमैर्थेः। आलूनाः
आच्छिन्नाः सटाः केसराः यस्य सः आलूनसटः। तं। सटा जटा केसरयोरित्यमरः। कस्मात् प्रमादात् तत्र
नवधननतः। कया योग्यतया। सामर्थ्येन। कां कयाकमिवादिनश्रीः दिव्यांशु चाउष्क रश्मिमिवाय
यादिनश्रीः दिनशोभा दीप्त्या कांत्या तत् चाउष्करश्मिं सूर्यं आरूढ अरोहतीत्यर्थः॥५०॥ पूर्वनि
र्व्यवसायस्य सच्चरित्र इत्यादिना दोषः उक्तः। इदानीं व्यवसायिनो गुणमाह। करोतीति। हे
अर्जुन यः पुरुषः क्रियाभिः चरितैः कर्मभिः। संभावनां योग्यतां अर्थवतीं सफलां करोति। वि
लक्षणां संभावनां शेषजनातिरिक्तां। शेषजनेभ्यः इतरलोकेभ्यः अतिरिक्ता शेषजनातिरिक्ता
तां शेषजनातिरिक्तां अधिकां सर्वातिशायिनीमित्यर्थः। हे अर्जुन गणनी संख्याद्विचादि संख्
संसन्तु समास्तु पुरुषाधिकारे योग्यपुरुषगणनावसरे जाते सति तं पुरुषं न समुपैति। न अ
भ्युपैति। न गच्छतीत्यर्थः। अद्वितीयो भवति एवं ते अन्ये यति पूरणी। तस्मात् त्वयात्र साधर
एयला मायमहान्तु उद्यमः आश्रेय इति भावः॥५१॥ अथ द्वाभ्यां श्लोकाभ्यां सुलभोद्योगस्य
प्राषितस्य कर्तव्यमुपदिशति। प्रियेष्विति। हे पार्थ मघवा इंद्रः तेषां अघानां व्यवसानां पा ॥५०॥
पानां वा विघातं निवारणं क्रियात् करोतु। तेषां केषां ये अघैर्व्यवसनैः पापैर्वा प्रियेषु अ

© Dharmartha Trust J&K. Digitized by eGangotri

स्मात्तु विषयेतव वेतः अंतःकरणं लभ सुखं दं एति॥ प्राप्नोति। किंलक्षणैः यैः उपपन्नैः विना उपपन्ना
विनाकारणेन विनाभिविंत्यमानैः अकस्मात् एवाशंकमानैः किंलक्षणस्य तव इच्छायाय विजय
यप्रयातस्य गच्छतः। तस्मात् जयार्थिना त्वया अस्माभिः त्वं तयावेतः न खेदितव्यमिति। अस्मान्नियः
उपास्यते सः इति शेषः॥ ५२॥ मा गतिा हे पार्थ एक वरसन्नपि एकाकी वरन्न न पिबन् अमारं दौर्बल्यं
अवधानतां मा गाः मा कार्षीः। किं कुर्वन् असंबाधशिवे पि देशे न विद्यते संबाधः यस्मिन् सः अस
बाधः विविक्तः अतएव शिवः कल्याणकारी॥ वियोऽइति कोर्थः चिरंकालं वसन् सन् असंबाधः
संकटः विजन इत्यर्थः असंबाधनिर्बाधः। न नु निस्पृहस्य मम कुतो नयमितिवाच्यं हि नि
तं मात्सर्यरागोपहतात्मनां पुरुषाणां मानसानि मनांसि साधुष्वपि सज्जनेषु विषये सबलो
विवर्त्तीते। अन्यथा न वर्तीत्यर्थः। मात्सर्यं च रागश्च मात्सर्यरागौ मात्सर्यरागाभ्यां उपहतः दू
आत्मा येषां ते मात्सर्यरागोपहतात्मानः तेषां मात्सर्यरागोपहतात्मनां। स्वभावदुरात्मनामि
भावः। मात्सर्यं द्वेषः परोत्कर्षासहनं वा। रागः इच्छा स्नेहो वा ताभ्यां॥ ५३॥ निगमयति तदिति
हे पार्थिनः अस्माकं मनोरथान् मनोभिलाषान् सफलीकुरुष्व। शत्रून् निर्यातनेन अस्मान् प्र
तिष्ठापयेत्यर्थः। किं कुर्वन् मम हृष्टैः आशास्यतत्त्ववचनं आशुशीघ्रं कुर्वन् तपस्वरन्नित्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

६।

तपसा शातनिर्यातनकार्यसिद्धती त्यर्थः। किं वदन् अर्जुनं असिलतासहचरां परिरब्धुकामा च वर्त्तते।
आलिंगितुमिच्छतीत्यर्थः। किंयोलेः स्तनोपपीडं स्तनयोरुपपीड्य इति स्तनोपपीडं। किं लक्षणां
चां तपःसिद्धेः अनंतरं प्रत्यागतं पश्चादागतां गृहागतामित्यर्थः। पुनः किं लक्षणां चां लब्धार्थ
मिव लब्धतः संपादितः अर्थः तपलक्षणो येन असौ लब्धार्थः तं लब्धार्थं परिरब्धुं कामो यस्याः स
परिरब्धुकामा। अनुकामम् अनं सारणीति मिकार आपन्नः॥५५॥ उदीरितमिति। सः अर्जुनः न
अत्यर्थं दिदीपे जज्वाल च क्रोधात्। किंलक्षणः याज्ञसेन्याः द्रौपद्याः इति तां उदीरितां उक्तां वा
वं आसाद्य आकर्ण्य याज्ञसेनस्य राज्ञः अपत्यं स्त्री याज्ञसेनी द्रौपदी। किं लक्षणां वाचं उ
वीक्षितो गृहीतविप्रकारा नवीक्षितः पुनः उद्घाटनेन उद्धाहितः प्रत्यापितः निधापितः
प्रकारः परिभवो यस्याः सा नवीक्षितोद्धाहितविप्रकारा तां। क इव तिग्मरश्मिरिव यथा तिग्म
रश्मिः सूर्यः उदीचीं काष्ठां दिशं आसाद्य प्राप्य दीप्तो भवति। दिशस्तु ककुभः काष्ठा इत्य
मरः॥५६॥ अथेति। सः अर्जुनः भीषणं भयंकरं वपुः शरीरं बभार। भीषयत इति भीषणं। ।५
किंलक्षणः रम्योपि मनोहरोपि। पुनः किंलक्षणः सः उत्थे स्थिते पुरः अग्रे विद्विषः शत्रून् अ
भिपश्यन्निव स्थितः अभिमुखं पश्यतीत्यर्थः पुनः किं लक्षणः अर्जुनः पुरोधसा रोपितहे

© Dharmartha Trust J&K. Digitized by eGangotri

तिसंततिः। पुरोधसा धौम्येन आरोपिता आहिता ह्याहृतीनां आयुधानां संहतिसमूहो यस्य सः
आरोपितहेतिसंहतिः। क इव मंत्र इव यथा रम्योऽपि मंत्रः भीषणो भवति। किंलक्षणः मंत्रः
अभिचारिकीं क्रियां गतः प्राप्तः। अभिचारः परहिंसा प्रयोजनं यस्याः सा आभिचारिकी तां
अभिचारकर्मणि प्रयुक्तो मंत्रः प्रकृत्या रमणीयोऽपि भीषयतीत्यर्थः॥ ५६॥ अविलंघ्येति।
त्रिभिः श्लोकैः उक्तसाधूचंरोणं विवृण्वन्। अस्य अर्जुनस्य प्रस्थानमाह। सः अर्जुनः तपो
भृतां द्वैतवननिवासिनां तपस्विनां हृदयानि मनांसि समाविवेश आखेदयामास। मुनि
भिः कृदिधृत इत्यर्थः। किं कुर्वन् कार्मुकं वहन्। किंलक्षणं कार्मुकं। परैः अर्जुनादन्यैः अ
विलंघ्यविकर्षणं। अविलंघ्यं अनतिक्रमणीयं विकर्षणं आकर्षणं यस्य तत् अविलं
घ्यविकर्षणं। अमोघाकर्षणं अरिवधकारकमित्यर्थः। पुनः किंलक्षणं कार्मुकं। प्रथि
तज्यारवकर्म। प्रथितं प्रसिद्धं ज्यारवस्य कर्म चापमोक्षणादि यस्य तत्। ज्यायाः प्रत्यंचा
याः रवः ज्यारवः शब्दः ज्यारवस्य कर्म व ज्यारवकर्मणी। प्रथितविस्तीर्णज्यारवकर्म
णीयस्य तत् प्रथितज्यारवकर्म। किं कुर्वन् महेषुधी वहन्। महांतश्च ते इषवश्च महेषवः
महेषवः धीयंते ययोः तौ महेषुधी। किंलक्षणौ महेषुधी। अरिद्विषिगोचरं अगतौ।

© Dharmartha Trust J&K. Digitized by eGangotri

अप्राप्तो। आहवेषु। अनिवर्तित्वात् अस्येति भावः। पुनः किंलक्षणो महेषुधी। शितनिस्त्रिंशयुक्तो शि
तेति-शितेन निस्त्रिंशेन खड्गेन युक्त इति शितनिस्त्रिंशयुक्तो। निर्गतः त्रिंशद्भ्यो अंगुलिभ्य इति निस्त्रिंशः
खड्गः॥५७॥ यशसेवेति। पुनः किंकुर्वन् कवचं तनुत्रं वहन्। किंलक्षणं कवचं सरत्नोऽरत्न
युक्तं। पुनः किंलक्षणं कवचं महसा स्वकान्त्या गोत्रभिदायुधक्षतीः वज्रप्रहाररंध्राणि मुहुः वारं
वारं तिरोदधत् आच्छादयन्। गोत्रभिदः इंद्रस्य आयुधं वज्रं तस्य क्षतीः प्रहाराणि व्यर्थाः। किंल
क्षणेन महसा। उत्प्रेक्षते यशसा इव। मूर्तिमत्तया कीर्त्या इव। किंलक्षणं कवचं। उत्प्रेक्ष्यते
वः गगनस्य अंतरमिव स्थितं। आकाशस्य मध्यभागमिव स्थितं। किंलक्षणं अंतरं। ज्व
लितज्योतिः। ज्वलंति प्रदीप्तानि ज्योतींषि नक्षत्राणि ताराः यस्मिन् तत् ज्वलितज्योतिः॥५८॥ अल
काधिपेति। पुनः किंलक्षणः सः पृथ्वीधरवर्त्मसंप्रयान् पृथ्वीधरः पर्वतः हिमालयः तस्य व
र्त्म मार्गं संप्रयान् प्रतिष्ठमानः। किंलक्षणं पृथ्वीधरवर्त्म। अलकाधिपभृत्यदर्शितं। अल
काधिपः धनदः तस्य भृत्यो यक्षः तेन दर्शितं। पुनः किंलक्षणं वर्त्म। अत एव शिवं। नि
र्बाधं भयरहितं। किंलक्षणो नांतपोभृतां। उद्बाष्पदृशां। उद्गताः बाष्पाः यासु ताः उद्बाष्पाः ॥५९॥
उद्बाष्पा दृशो येषां ते उद्बाष्पदृशः तेषां। उद्बाष्पदृशां। पथि मार्गं गच्छता अर्जुनेन सह
वियोगदुःखात् साश्रुनेत्राणां। तपोभृतां मुनीनां हृदयानि समाविवेश। आखेदयामा

© Dharmartha Trust J&K. Digitized by eGangotri

सइतिवाक्यार्थः॥५८॥ अनुजग्मुरिति। अथानंतरं आशाः दिशः दुंदुभिध्वानं शब्दं अनुजग्मुः अनु
रुधुः॥ दुंदुभीनां भेरीणां ध्वानः शब्दः तं। किंलक्षणं दुंदुभिध्वानं दिव्यं। दिवि भवं दिव्यं। तथा च
सुरकुसुमनिपातैः व्योम्नि आकाशे लक्ष्मीः शोभा वितेने। विस्तृता। सुराणां देवानां कुसुमानि सु
रकुसुमानि सुरकुसुमानां निपाताः वृष्टयः। कल्पवृक्षपुष्पवृष्टिर्बभूवेत्यर्थः॥ किंविपयोधिः स
मुद्रः भुवं पृथ्वीं आलिलिंग। आलिंगनं चकार। किं करिष्यन्निव प्रियं कथयिष्यन्निव यथा कश्चिन
नायकस्वां नायकां प्रियं कथयिष्यन्निव आलिंगति। किंलक्षणः पयोधिः अनिभृतवेलावीचि
नभृतः। अनिभृताः अनिभृताः चंचलाः वेलायां तटे वीचयः तरंगा एव बाहवो यस्य सः अनिभृतवे
लावीचिबाहुः किंलक्षणां भुवं स्फुरंतीं हर्षात् स्पंदमानां। नायिकापक्षे साचिकभावात् प्रादु
र्भूतरोमांकुरां॥६०॥ ॥श्रीः॥ ॥इति श्रीकिराताऽर्जुनीयमहाकाव्ये श्रीनृसिंहविरचितान्
न्वयदीपिकायां तृतीयः सर्गः॥ ॥श्रीः॥ ॥तत इति। ततः तदनंतरं प्रस्थानानंतरं सः एवं लक्ष
अर्जुनः उपपन्नं जनसमीपे भुवं धरां समाससाद॥ उपगतवानित्यर्थः। किंलक्षणः अर्जुनः ज
नप्रियः जनानां प्रियः अघवाजनाः प्रियाः यस्य वा। किंलक्षणां भुवं। कूजत्कलहंसनादिनीं॥
कूजंतः शब्दायमानाः कलहंसाः मधुराः यस्यां सा पुनः किंलक्षणां भुवं। सपाकसस्याहित
पांडुतागुणां। पाके न सह वर्तंते तानि सपाकानि निपक्वानि सस्यानि व्रीहयः सपाकानि बतानि
सस्यानि वा सपाकसस्यानि तैः आहितः संपादितः पांडुतेव गुणो यस्याः सा सपाकसस्या

© Dharmartha Trust J&K. Digitized by eGangotri

हितपांडुतागुणां। तां। कामिवा। प्रियामिव। यथा कश्चित्कामी उपजनं सखीसमीपे प्रियां वहन् प्रांजा प्राप्नोति।
किंलक्षणां प्रियां। कूजत्कलहंसनादिनीं। कूजंतः कलकलाः कलहंसाः नूपुराणि मेखला वयस्यां सा
तां। पुनः किंलक्षणां प्रियां। सपाकसस्याहितपांडुतागुणां। सपाकसस्येन आहितः संपादितः पांडुता
गुणो यस्याः सा। तां। पुनं किंलक्षणां प्रियां। आसादितयौवनां। आसादितं संपादितं यौवनं तारुण्यं
यया सा। आसादितयौवना तां। उपमालंकारः॥१॥ समासांत विधेरनित्यत्वात् अत्र नस्यैति समा
तः षष्ठूतः। अन्यथा उपसीम इति स्यात्। किंलक्षणाः स्थलीः। विनम्रशालिप्रसवौघशालि
विनम्राः अवनताश्च ते शालिप्रसवाश्च। तेषां ओघः समूहः तेन शोभंते। ताः विनम्रशालिनं
ताः विनम्रशालिप्रसवौघशालिनीः। अत्र प्रसवशब्देन फलवसुपवर्यते। शालिप्रसवानां प
लरूपत्वात् पुनः किंलक्षणाः स्थलीः अपेतपंकाः। अपेतः गतः पंकः कर्दमः याभ्यः ताः अपे
तपंकाः। शरद्दिनिं कृपाः स्थल्यो नवं नीतार्थः। पुनः किंलक्षणाः स्थलीः। ससरोरुहांभसः। सरो
रुहैः कमलैः सह वर्त्तते यानि सरोरुहाणि सरोरुहाणि अंभांसि पानीयानि यासु ताः। ससरोरुहांभ
सः। सकमलकमलाः। पुनः किंलक्षणाः स्थलीः। उपायनीभूतशारद्गुणश्रियः। उपायनीभूताः
उपहारभूताः उपढौकिताः शारद्गुणानां श्रियः समृद्धयः संपदः यासु ताः। उपायनीभूतशार
द्गुणश्रियः। अर्जुनं प्रतिइति शेषः॥२॥ निरीक्ष्यमाणेति। शफरीविवर्त्तयः मत्सी स्फुरणानि पर॥
अस्य अर्जुनस्य मनः जह्रुः। हृतवत्यः। तद्दर्शनेकपरा बभूव इत्यर्थः। शफरीणां मत्सीनां विं

© Dharmartha Trust J&K. Digitized by eGangotri